RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484
सत्यनिष्ठा जयेल्लेखनी निर्भया

|| ओ३म् ||

शक्यो वारयितुं जलेन
हुतभुक्छत्रेण सूर्यातप्तो,
नागेन्द्रो निशिताङ्कुशेन समदो
दण्डेन गोगर्दभौ।
व्याधिर्भेषजसङ्ग्रहैश्च
विविधैर्मन्त्रप्रयोगैर्विषं,
सर्वस्यौषधमस्ति शास्त्रविहितं
मूर्खस्य नास्त्यौषधम्॥11॥
(नीतिशतकम्)

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्
संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

|| ओ३म् ||

साहित्यसङ्गीतकलाविहीनः
साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानः
तभ्दागधेयं परमं पशूनाम्॥12॥
येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूताः
मनुष्यरूपेण मृगाश्चरन्ति॥13॥
(नीतिशतकम्)

卐 वर्षम्-८ 卐 अंकः-२२ (१९०) 卐 १६ मईः २०१९ तः ३१ मईमासः २०१९ पर्यन्तम् 卐 विक्रमसंवत्-२०७६ 卐 सृष्टिसंवत्-१,९६,०८,५३,११७ 卐 पृष्ठम्-८

## ज्योतिषिणां सम्मानं कृतवान् मुख्यमंत्री त्रिवेन्द्ररावतः

देहरादून। ग्राफिकएरापर्वतीयविश्वविद्यालये प्रचलित द्विदिवसीय ज्योतिषमहाकुंभस्य समापनं ज्योतिषज्ञानां सम्मानेन् अभवत्। अस्मिन्नवसरे मुख्यातिथिरूपे समागत मुख्यमंत्री त्रिवेन्द्रसिंहरावतः ज्योतिषज्ञानां अत्र आगमनार्थं धन्यवादः दत्तवान। मुख्यमंत्री एवं राज्यमंत्री रेखाआर्यः ज्योतिषाचार्य के.ए.दुबेपद्मेश, वास्तुशास्त्री डॉ.सतीशशर्मा, अजयभावी, चन्द्रशेखरशास्त्री, पंडितलेखराजः, आचार्य डॉ. सुगांतराज, ज्योतिषचार्यः लक्ष्मीकांतत्रिपाठी, डॉ. नन्दितापांडेया, अलकाभिमोठी, मां त्रिशला, एल.एस.ः, पुनीतभोला, आचार्य चंडीप्रसादधिल्डियाल; एस.एस.रावत समेत 150 ज्योतिषज्ञान् सम्मानितवान्




मुख्यमंत्री उक्तवान् यत् विश्वे ये अन्तरिक्ष अनुसन्धानकार्यं प्रचलित तस्य सर्वस्य केन्द्रं ज्योतिषमस्ति। ज्योतिषस्य खगोलविज्ञानं भारतस्य महत्वोपलब्धिरस्ति। ते उक्तवन्तः यत् बहु विद्या एतादृशीरस्ति या भारतं विश्वं दत्तवान् परञ्च विश्व तस्य श्रेयः भारतं न दत्तवान्।

शेषभागःद्वितीयपुटे

## श्रीनगरे उत्तराखण्डज्योतिपरिषदः स्थापनादिवसमारोहः

श्रीनगरम्। राष्ट्रियज्योतिषपरिषदस्य उत्तराखण्डशाखायाः एकदिवसीया समारोहे नगरपालिकायाः प्रायसः पञ्चदशवर्ष पर्यन्तं अध्यक्ष पदे सुशोभित स्व. भास्कशनन्दमैठानी महोदस्य लिखित ज्योतिषपाण्डुलिपेः अपि प्रदर्शनमभवत्। अस्य महत्वं विषये उक्त्वा ज्योतिषयः अस्य



संरक्षणार्थमुक्तवन्तः।

गढ़वालमंडलविकासनिगमस्य टुरिस्टविश्रामगृहस्य सभागारे मुख्यातिथि राष्ट्रिसंस्कृसंस्थानम्

शेषभागःद्वितीयपुटे

## परिवर्तनस्य युगे संस्कारयुक्तशिक्षायाः आवश्यकता

जैनपुरम्। वीरबहादुरसिंहपूर्वांचलविश्वविद्यालयस्य प्रो. राजेन्द्रसिंहः रज्जुभैया भौतिकीविज्ञानमध्ययनमेवं शोधसंस्थाने परिवर्तनस्य परिवेशे उच्चशिक्षा एवं आह्वाहन विषये संगोष्ठ्याः आयोजनमभवत्। मुख्यातिथि रुपे महर्षि वाल्मीकिसंस्कृतविश्वविद्यालयस्य कुलपति



डॉ. श्रेयांशद्विवेदी उक्तवान यत् भारतं अर्पणम्, समर्पणमेवं तर्पनस्य भूमिरस्ति। अद्यतनीय शिक्षा केवलं उद्योगोत्पादक आस्ति। इदानीं सर्वत्र संस्कारयुक्त शिक्षायाः अभावः दृश्यते। परिवर्तनस्य युगे संस्कारयुक्त शिक्षायाः आवश्यकतास्ति। ते उक्तवन्तः तकनीकेः क्षेत्रे अस्मान् स्व परंपरागत विज्ञानं संरक्षणस्य आवश्यकताऽस्ति। येन् विदेशेषु अस्माकं देशस्य योगदाने प्रकाशं भवेत्। कुलपति प्रो. राजारामयादवः उक्तवान यत् विश्वविद्यालयस्य अर्थोऽस्ति यत् यत्र विश्वस्य छात्राः पठितुं आगच्छन्ति। एतेषां उद्येश्यानां पूर्तिं भारते नालन्दा सदृश विश्वविद्यालयः करोति स्म। अतिष्ठाता छात्रकल्याणं प्रो. अजयद्विवेदी उक्तवान यत् रोजगार उत्पाद्यर्थं कौशलयुक्त शिक्षायाः आवश्यकताऽस्ति। संस्थानस्य निदेशक प्रो. प्रमोदयादवः अतिथिनां स्वागतं कृतवान्। कुलपति राजारामयादवं श्रेयांशद्विवेदी कुलाधिपति रामनाईक रचित पुस्तकं चरैवेति-चरैवेति एवं विश्वविद्यालयस्य गतिमान पत्रिका दत्तवान। प्रो. केपीसिंह, प्रो.ए.के.श्रीवास्तव, प्रो. अजयप्रतापसिंहः, डॉ. राजकुमारः, प्रो. संतोषकुमारः, डॉ. सुनीलकुमारः, डॉ. दिग्विजयसिंहराठौडः, डॉ. अमरेन्द्रसिंहः, डॉ. पुनीतधवन, डॉ. मनीषगुप्ता, डॉगिरिधरमिश्रः, डॉ.नीरजअवस्थी इत्यादयः शिक्षकाः उपस्थिताः आसन्।

## आयुर्वेदौषधि-प्राकृतिकचिकित्सयोर्विश्वस्तरे प्रसारः कार्यः - योगगुरुः बाबा रामदेवः



बाबारामदेवस्य पतंजलियोगपीठः आयुर्वेदिकऔषधि मेडिसिन इत्यस्य स्तरे स्थापनार्थं संलग्नोऽस्ति। तेन् सह प्राकृतिकचिकित्सा अपि तस्य स्थाने भविष्यति। योगपीठस्य अनुसंधानकेन्द्रः एतदर्थं आवश्यक सामग्रीनां संकलनं अकरोत्। विदितोऽस्ति यत् पतंजलिअनुसन्धानप्रयोगशालायां आयुर्वेदिक औषधिनां क्लीनिकलट्रायल प्रचलित स्म। विभिन्न जन्तुनां व्याधिनां जीवाणुं त्यक्त्वा पुनः तस्योपचारं आयुर्वेदिक रीत्या भवति। सर्वं अनुसन्धानं एलोपैथिक पद्धत्यां प्रचलति। योगपीठस्य महामंत्री आचार्यबालकृष्णः उक्तवान् भारते ऋषुमुनि प्रकृत्या आयुर्वेदस्य ज्ञानं प्राप्तवान।

भारतसर्वकारः एवं प्रेदशस्य सर्वकारस्य अनेक आयुर्वेविश्वविद्यालयः प्रमाणपत्रं प्रददाति। परञ्च विश्वे अस्य मान्यता नास्ति। प्राकृति चिकित्सायाः अपि उपयोगः सर्वत्र भवति परञ्च सोऽपि मेडिसिन रूपे मान्यता प्राप्त नास्ति।

ते उक्तवन्तः यत् एतेषां विश्वस्तरे मान्यता प्रदानार्थ योगपीठः वचनबद्धोऽस्ति। अन्ताराष्ट्रियसंस्थां अस्य अनुसन्धानस्य विषये उक्तवान्। बाबारामदेवस्य इच्छा वर्तते यत् यथा योग अन्ताराष्ट्रियस्तरे मान्यताप्राप्तोऽस्ति तद्वदेव अयुर्वेदोऽपि मेडिसिन रूपे भवेत्।

**प्रथमपुटस्य शेषभागः**

## श्रीनगरे उत्तराखण्डज्योतिपरिषदस्य स्थापना दिवसमारोहः

देवप्रयागस्य ज्योतिषविभागाध्यक्ष डॉ. मुकेशशर्मा ज्योतिषगणनायाः वैज्ञानिकाधारे प्रकाशं दत्तवान्। श्रीनगरनगरपालिकायाः पूर्वाध्यक्ष कृष्णानन्दमैठाणी विशिष्टातिथि उक्तवान यत् ज्योतिषगणनायाः महत्वं व्यक्तेः जीवनाय प्रभावी भवति। अस्य संरक्षणं भवितव्यम्। सम्मेलनस्य अध्यक्षता समये राष्ट्रिज्योतिषपरिषदस्य राष्ट्रियअध्यक्ष चन्द्रशेखरशास्त्री ज्योतिषस्य विभिन्न विद्यायाः विषये उक्तवान्। सम्मेलने ज्योतिष-चिकित्सायामुपरि अपि चर्चा अभवत्। सम्मेलन-संयोजक भाष्करानन्दअंथवालः उक्तवान यत् व्यक्तेः कुण्डल्याः अध्ययनाधारे तस्य भविष्यकथनं वैज्ञानिकाधारे भवति। द्वितीय सत्रे शोधछात्रां पत्रवाचनं कृतवन्तः। डॉ. प्रकाशचन्द्रचमेली सम्मेलनस्य संचालनं कृतवान।

भाष्करानन्दअंथवालः उत्तराखण्डराष्ट्रियज्योतिषपरिषदस्य अध्यक्षरूपे चितवान्। तत्र ज्योतिषयः प्रो. डॉ. रामानन्दगैरालां प्रदेशउपाध्यक्ष एवं डॉ. प्रकाशचमेली प्रदेशमहासचिव रूपे चितवन्तौ। पं. राकेशथपलिवासः एवं अनीलसिंधवालं प्रदेशसंगठनसचिव, नीवनप्रकाशनौहियाल, राजीव विश्नोई महोदयं प्रचारसचिव, विपिनडंडटियालं मंडलप्रमुखः रूपे चितवन्तः। आचार्य सुरेन्द्रप्रसादकुकरेति जिलाप्रमुख, पंदिनेशप्रसादजोशी तिहरीजिलाप्रमुख, प्रो. गोविन्दवल्लभभट्टं बागेश्वरजिलाप्रमुख रूपे चितवन्तः।

**प्रथमपुटस्य शेषभागः**

## ज्योतिषज्ञान् मुख्यमंत्री त्रिवेन्द्रः सम्मानितं कृतवान्..

आधुनिकसमये मनुष्य अन्तिरिक्षकार्यक्रमान्तर्गत् विभिन्नेषु गृहेषु गच्छति परञ्च अस्याधारः भारतीयज्योतिषमस्ति। विश्वस्य विभिन्न देशः ज्योतिषस्य उपहासं कृतवान् परञ्च इदानीं अस्माकं ज्योतिषज्ञः तान् कथयन्ति कथं मानवजीवने इदं उपयोगी वर्तते। इदानीं विश्वे फलितज्योतिषस्य मान्यतावर्तते एतदर्थं ज्योतिषज्ञः धन्यवादस्य पात्रोऽस्ति। श्रीमतीरेखाआर्या ज्योतिषस्य क्षेत्रे महिलायाः योगदानार्थं उल्लासं व्यक्तवती।

अस्तिन् क्षेत्रे महिलायाः योगदानं सुचयन्ति यत् ता अपि पुरूषेन सह कार्यं करोति स्म। एतदर्थं ताः "बेटी पढ़ाओ बेटी बचाओ" कार्यक्रमे योगदानं ददातु। सम्मानसमारोहे अतिथिज्योतिषाचार्यः, संस्थायाः अधिकारीणः, अमरउजालापरिवारस्य सदस्याः आसन्। संचालनं हिमानीबिंजोला कृतवती।

## देशस्य समक्षं राष्ट्रियसुरक्षा आतंकवादश्चेत्युभमपि महत्समस्यात्मकम्-जेटली

नवदेहली। वित्तमंत्री अरूणजेटली सोमवासरे विपक्षस्य राष्ट्रियसुरक्षायाः तर्कस्य खण्डनं कृतवान्। ते उक्तवन्तः यत् सुरक्षा एवं आतंकवादः दीर्घकालिक समस्याऽस्ति। एवं अन्यासां समस्यानां समाधानं तु सरलमस्ति।



ते उक्तवन्तः यत् भारतस्य समक्षे महत्वपूर्ण समस्या जम्मुकश्मीरस्यास्ति। सा राष्ट्रस्य सम्प्रभुतया युक्तोऽस्ति। ते फेसबुकपोस्ट मध्ये विपक्षस्य प्रश्न चुनावः वास्तविक समस्यायाधाटे भविष्यति नतु राष्ट्रियसुरक्षा एवं आतंकवादस्य विषये इत्यस्य समाधानरूपे उक्तवान् यत् मम् मतमस्ति यत् राष्ट्रियसुरक्षा एवं आतंकवादः दीर्घकालीकी समस्यास्ति एवं अन्या समस्या तु क्षणिकोऽस्ति। विपक्षस्य तर्कमस्ति यत् पुलवामायां धटिक धटनायाः विषये सर्वकारः राजनीति करोति। तदुपरान्त जेटली उक्तवान यत् इयं समस्या देशस्य सम्प्रभुता एवं अखण्डतया युक्तोऽस्ति। ते उक्तवन्तः यत् पीडीपी एवं नेकां निराशापूर्णं भुमिकायाः निर्वहणं करोति।

ते उक्तवन्तः यत् एकः समक्ष सर्वकारः एवं स्पष्ट हृदयशील नेता कश्मीरस्य समस्यायाः समाधानाय सक्षमोऽस्ति। एतदर्थं अतीतस्य ऐतिहासिक अक्षमतां सम्यक् करणस्य आवश्यकतास्ति।


ओ३म्

भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण (द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)

सत्य के प्रचारार्थ

सत्यार्थ प्रकाश

सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| ● प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| ● विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| ● स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन

कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति सत्यार्थ प्रकाश के प्रचार प्रसार में सहभागी बनें

आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com


## विद्यावाचस्पति डॉ सुन्दरनारायणझामहोदयाः बादरायणव्याससम्मानेन अलंकृताः

वार्ताहरः- राजेशकुमारझाः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य वेदविभागस्य सहायकाचार्याः लब्धप्रतिष्ठाः साहित्य वेदाचार्याः विद्यावाचस्पति डॉ. सुन्दरनारायणझामहोदयाः, भारतसर्वकारस्य मानवसंसाध




नमंत्रालेन् महर्षिबादरायणव्याससम्मानेन अलंकृताः।

पुरस्कारः अयं नवदेहल्यां गुरूवासरे "अशोकहोटल" इत्यस्मिन् स्थले आयोजित कार्यक्रमे उपराष्ट्रपतिमहोदयैः श्रीमद्भिः वैंकयानायडुमहोदयैः प्रदत्तः।

वादरायणव्यासपुरस्कारे उत्तरीयवस्त्रम्, अभिनन्दनपत्रम्, एकलक्षरूप्यकाणि च प्रदीयन्ते।

झा महोदयाः अप्रैलमासस्य त्रिंशत् दिनांके 1972 ईशवीयाब्दे ग्रामपंचायतराजहनुमाननगरे (उद्दीवाबुटोलायां) दरभंगामण्डलान्तर्गत बिहारप्रान्ते जन्म प्राप्तवन्तः। इमे महोदयाः पुरूषमेघयज्ञस्यसमीक्षात्यकअध्ययनम्, कातीयेष्टिदीपकः "हीरा" हिन्दी टीका, अव्ययपुरूषनिरूपणम्, शुक्लयजुर्वेदीयनित्यकर्मपद्धति, वेदयाज्ञिकपद्धतिमाधारिकृत्य श्रौतयज्ञविश्लेषणम् सहित नव पुस्तकं रचितवन्तः। पञ्चपञ्चाशत् निबन्धाः त्रयः काव्यः, तिस्त्रः, लघुकथा आलेखाः च प्रकाशितानि। एते ई.पी.जी. पाठशालापरियोजनायां एम.ए संस्कृतस्य पाठ्यक्रमं पूर्त्यर्थं स्व योगदानं दत्तवन्तः एवञ्च एम्.ओ.ओ.सी. परियोजनान्तर्गत् वैदिकभाषा एवं साहित्यपरियोजनायाः सहसमन्वयकस्यरूपे स्व योगदानं दत्तवन्तः।

## नैतिकशिक्षया बालकानां नकारात्मकता दूरी भविष्यति

हुड्डासेक्टर स्थित मनमुक्तभवने बालसाहित्य एवं नैतिकता विषये केन्द्रित इंडोनेपालबालसाहित्सम्मेलनं द्वयोः सत्रयोः सम्पन्नो जातः। एषु मुख्यातिथिरूपे हरियाणासंस्कृतअकादम्याः उपाध्यक्ष डॉ. श्रेयांशद्विवेदी आसीत्। अध्यक्षता खटिमाउत्तराखण्डस्य



पूर्वसहायकउपायुक्त डॉ.राजकिशोरसक्सेना कृतवान्। प्रथमसत्रे उत्तराखण्डसंस्कृतविश्वविद्यालयस्य हिन्दीविभागाध्यक्ष डॉ.दिनेशभोला, राजस्थानास्य वरिष्ठबालसाहित्यकार गोविंदशर्मा, रायपुरराजस्थानस्य डॉ. सत्यनारायणसत्यः, गुरूग्रामस्य डॉ.धमंडीलालअग्रवालः, पूर्वचार्य डॉ. शिवतासिंहः, जिलाबालककल्याणअधिकारी विपिन शर्मा, महेन्द्रनगरनेपालस्य रामचन्द्रः, उत्तरप्रदेशस्य डॉ. शैलेन्द्रसिंहः, कंचनपुरनेपालस्य लक्ष्मीदत्तभट्टः इत्यादयः विद्वान्सः एवं बालसाहित्यकाराः बालसाहित्ये नैतिकतायाः महत्वमेवं नैतिकशिक्षायाः आवश्यकता विषये उक्तवन्तः। अनेन सिद्धो अभवत् यत् नैतिकशिक्षायामाध्यमेनैव संस्कारस्य संचरणं भविष्यति। द्वितीयसत्रस्य संचालनं बालबाटिकापत्रिकाराजस्थानस्य संपादक डॉ. भेरूलालशर्मा कृतवान् तत्र डॉ. श्रेयांश द्विवेदी मुख्यातिथि आसीत्।

# अभिराजगलज्जलिकायां कथ्यप्रकारः

लेखकः
डॉ. राजकुमार मिश्रः
सहायकाचार्यः, साहित्यविभागः
हरियाणा संस्कृत विद्यापीठम्
बघौला,पलवलम्, हरियाणा 121102

अर्वाचीनसंस्कृतकवितायाम् अभिराजराजेन्द्रमिश्रस्य नाम को वा संस्कृतज्ञो न वेत्ति । अभिराजराजेन्द्रमिश्रः प्राज्यं संस्कृतकवितासाम्राज्यं स्वविपुलरचनानिधिभिः अनारतं विशदयन् वर्तते । अभिराजो युगानुरूपं स्वविपुलकाव्यरचनया अद्यत्वे युगे संस्कृतं लोकप्रियतां प्रापयति । अभिराजकवितायाम् अनेके काव्यगुणाः समवतिष्ठन्ते । अभिराजस्य कवितायां बहुत्र अनेके अव्यक्ता भावाः समुन्मीलन्ति तथा चानेन कृता अनेके अभिनवाः प्रयोगा अपि संस्कृतं प्रगुणयन्ति । अभिराजकवितायां संवेदनायाः प्रसारः कथनकम्रता च प्रतिपदं विलोकयितुं शक्येते । प्रस्तूयमानशोधपत्रेऽस्मिन् अभिराजस्य गलज्जलिकाकाव्ये स्थिताः प्रतिपदं व्यक्ताश्च केचन काव्यगुणाः समीक्षापदवीमानेष्यन्ते ।

अभिराजस्य काव्येषु का कला का विशेषता ? ।
समीक्ष्यते यथाज्ञानं शोधपत्रे भवत्पुरः1 ।।

संस्कृतकाव्यगङ्गा वैदिककालात् स्वमधुरगत्या प्रवहमाना इदानीम् एकविंशशताब्दीं प्राप्ता वर्तते । प्राग्वद् अद्यापि अनेके कवयो महाकवयः स्वस्वमनोभावकुसुमैः एतस्याः काव्यगङ्गायाः परिसेवने तत्परा वर्तन्ते येषु आचार्यरेवाप्रसादद्विवेदि-आचार्याभिराजराजेन्द्रमिश्र-आचार्यरमाकान्त-शुक्ल-आचार्यराधावल्लभत्रिपाठिप्रमुखाः शताधिका महाकवयो वर्तन्ते । एतेषां निरन्तरपुष्कलरचना-कुसुमैः संस्कृतकाव्यगङ्गेयं बृहत्पुण्या बृहदाकारा च सती प्रतिपलं वृद्धिमुपयाति । एतेषु काव्यकारेष्वपि महाकवेः अभिराजराजेन्द्रमिश्रस्य काव्यप्रणयने सर्वाधिका सक्रियता सहृदयैः अनुभूयते । अभिराजराजेन्द्रमिश्रवर्येण अनेकानि महाकाव्यानि, नाटकानि, खण्डकाव्यानि, कथा, कथानिका, गलज्जलिकादीनि काव्यानि प्रणीतानि । अभिराजस्य स्वकवितायामेतावान् प्रत्ययो वर्तते यद्बलेन स आत्मानं संस्कृतवाग्वधूट्या लावण्यं मनुते-

प्रागल्भ्यं काश्यपोऽस्याः प्रणतिपरिमितो बच्चुलालोऽपि मानः
कारुण्यं श्रीनिवासः स्मितचटुलकला भास्करो वल्लभोऽङ्कः ।
रोषः कान्तो रमाया निभृतरसकथा दीक्षितव्यूढपुष्पा
लावण्यञ्चाभिराजो जयति नवनवा संस्कृता वाग्वधूटी2 ।।

अभिराजप्रणीतकाव्यानां संख्या साम्प्रतं शताधिका वर्तते । किन्तु प्रस्तूयमानशोधपत्रे मया केवलं महाकवे राजेन्द्रमिश्रस्य गलज्जलिकाकाव्यगतं किञ्चिद् वैशिष्ट्यं स्फोरयितुं प्रयत्यते । 'गलज्जलिका' वस्तुतः फारसीककाव्यविधा वर्तते । फारसीके काव्ये 'गलज्जलिका' 'गजल' इति नाम्ना ज्ञायते । फारसीक- 'गजल'-शब्दस्य संस्कृते 'गलज्जलिका' इति नामकरणं सर्वप्रथमम् अभिराजराजेन्द्रमिश्रेणैव कल्पितम् । अभिराजेन 'गलन्ति जलानि नेत्राश्रूणि यस्यां सा गीतिः गलज्जलिका'3 इति व्युत्पत्तिः कृता । संस्कृतसाहित्ये गलज्जलिकाविधायां सर्वप्रथमं महाकविभिः भट्टमथुरानाथशास्त्रिभिः काव्यं प्रणीतम्, तदनु अस्यां विधायाम् आचार्यैः बच्चुलाल-अवस्थिमहाभागैः अनेकानि मनोहराणि काव्यानि प्रणीतानि । इदानीम् अभिराजराजेन्द्रमिश्रः स्वीयैः अनेकविधैर्मनोरमैः काव्यैः गलज्जलिकाविधां समेधयन् वर्तते । गलज्जलिकायाः प्राक्तना रचयितारो यत्र केवलं फारसीकसम्बद्धान् नियमान् आधृत्य कवितां रचितवन्तः, तत्र अभिराजेन अस्याः क्षेत्रं विविधेन अभिनवेन प्रयोगेण व्यापकीकृतम् । फारसीकभाषायां हिन्दीभाषायां वा यदि गलज्जलिकाशैल्यां काव्यं रच्यते तर्हि तत्र वर्णक्रमस्य पालनं करणीयं भवति । फारसीकहिन्दीभाषयोः गलज्लिकाकाव्ये आवश्यकतानुसारं कुत्रचिद् ह्रस्वो वर्णो दीर्घरूपेण पठ्यते एवमेव कुत्रचिद् दीर्घो वर्णो ह्रस्वरूपेण पठ्यते, किन्तु संस्कृतभाषायां वर्णाः तथैव पठ्यन्ते यथा ते भवन्ति । संस्कृते ह्रस्वो वर्णो ह्रस्वतया दीर्घो वर्णो दीर्घतयैव पठ्यते । वर्णानाम् एवम्भूतो क्रमः फारसीकभाषायां 'बहर' इति नाम्ना ज्ञायते । किन्तु फारसीकदृशा संस्कृतभाषायां वर्णक्रमस्य पालनं सर्वथा असम्भवमिति हेतोः संस्कृतगलज्जलिकाकारैः 'वर्णक्रम' इति स्थाने 'मात्राक्रमः' आश्रीयते । यथा-

वाप्या यया न तृषा हृता तस्याः सखे ! स्मतिरेव का
नियतिर्नितान्तबलीयसी तस्याः सखे ! गतिरेव का4 ।।

अत्र प्रतिपंक्तिकम् अष्टाविंशतिमात्रा वर्तन्ते । अभिराजकाव्ये मात्रासंख्यादृष्ट्या वैविध्यं द्रष्टुं शक्यते । विंशतिमात्रासु रचिता गलज्जलिका यथा-

न मे वर्णमालोक्य दृष्टिं निवर्तय
दृशौ भूषये, कज्जलं मामवेहि ।।
रणन्मन्दमन्दं न वोपेक्षेणीयम्
गतिं भूषये, नूपुरं मामवेहि5 ।।

अभिराजः स्वगलज्जलिकाकाव्ये बहुत्र मात्रास्थाने पारम्परिकच्छन्दांसि प्रयुनक्ति, तत्र स्रग्विणीछन्दसः प्रयोगो यथा -

नामरूपे प्रदत्ते ध्रुवं येन मे
मूर्तिकाराय तस्मै नमो मे नमः ।।
स्थापिता खेऽवलम्बं विना येन भूः
सृष्टिकाराय तस्मै नमो मे नमः6 ।।

स्रग्विणीच्छन्दसा रचिते उपर्युक्तगलज्जलिकाकाव्ये अभिराजः अद्भुतरसस्य अपूर्वं संसारं रचयति । एवंविधप्रयोगेण एतदपि रहस्यं प्रकाशितं जायते यद् ये आचार्याः केवलं परम्परावादिनो वर्तन्ते, ते प्रायेण पारम्परिकच्छन्दसि कृतां रचनामेव श्लाघन्ते, प्रकारान्तरविधायां रचनायै न भवति तेषाम् आदरः । किन्तु यदि ते अभिराजेन गलज्जलिकाविधायां पारम्परिकच्छन्दसा रचितां कवितां पठेयुः तर्हि तेषामपि मानसे गलज्जलिकायां स्वपारम्परिकच्छन्दःप्रयोगात् काचिद् आस्था उदेति, इति मे मनीषा ।

पुनश्च गलज्जलिकाविधायां पारम्परिकच्छन्दसां प्रयोगाद् एकमन्यदपि तथ्यं प्रकाशितं जायते यत् लोके केचन नवकवयः केवलं पारम्परिकविधायामेव काव्यानि रचयन्ति किन्तु ते गलज्लिकासौन्दर्यादपि प्रभाविता भूत्वा गलज्जलिकाविधायां काव्यं रचयितुम् ईहन्ते, परन्तु मात्राक्रमनिर्वाहे अनभ्यासात् अस्यां विधायां काव्यं रचयितुं ते समर्था न सन्ति, तादृशानां कवीनां कृते गलज्जलिकाविधायां पारम्परिकच्छन्दसामवतारः प्रयोगो वा तेषां गलज्जलिकाप्रवेशाय हेतुः भवतीति मन्ये ।

अभिराजो वैश्विकपरिप्रेक्ष्ये संस्कृतस्य महत्त्वं विशदयितुं, कामं स्वकवितायाम् अनेकान् अभिनवान् प्रयोगान् विदधाति, किन्तु स प्रत्येकस्मिन् प्रयोगे संस्कृतस्य पारम्परिकीं गाढतां विशुद्धां च भाषाशैलीं भारतीयां च भावभूमिमेव द्रष्टुं वाञ्छति । अभिराजः बहुत्र स्वकवितायां प्राचीनभावान् युगानुरूपं नवीकरोति । एतेन सहृदयेषु कश्चन नवः चेतश्चमत्कारो जायते, यथा-

कीदृशीयं रतिर्दर्शिता बन्धुभिः
मन्निवासाय लाक्षागृहं कारितम्7 ।।

महाभारते पाण्डवानां विनाशाय दुर्योधनः छद्मना लाक्षागृहं निर्मापयति, अद्यापि च अनेके हितकर्तकाः स्वहिताय तथा आचरन्तः कौटुम्बिकजनानां विनाशाय उद्यता दृश्यन्ते, इति दृशा महाभारतस्य अत्यन्तं प्रथितेन लाक्षागृहसम्बद्धकथावस्तुना परिचितः सन् कोऽपि पाठको यदा अभिराजप्रणीतं काव्यं स्वदते तदा स प्राचीनभावभूमेः नावीन्येन अन्तः प्रसीदति । किञ्च एवंविधः प्रयोगः तेषां कृते तु अवश्यमुपकाराय कल्पते ये पुराणादिगत-आख्यानेभ्यः सर्वथा अपरिचिताः सन्ति, ते यदि प्रथमतः एवंविधं काव्यं पठन्ति तर्हि ते पुराणादिरहस्यबोधनाय अपि उद्यता भवन्ति ।

अभिराजकाव्ये अनेकविधम् अपूर्वसौन्दर्यं विलोक्यते । महाकविकालिदासप्रणीते अभिज्ञानशाकुन्तले कण्वाश्रमस्य मृगाणां वर्णनं केवलं शकुन्तलायाः पतिगृहाय प्रस्थानपर्यन्तमेव वर्तते- यथा- 'विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगाः'8, तथा च 'उद्गलितदर्भकवला मृग्यः9' । शकुन्तलाया हस्तिनापुरगमनानन्तरं तस्याः प्रियतरवस्तूनां प्रियजनानां का दशा जाता ? इति कालिदासो न निरूपयति, केवलं शकुन्तलायाः दुष्यन्तेन साकं पुनर्मेलनस्य उपक्रमे कालिदासः कथावस्तु कल्पते । किन्तु अभिराजः शकुन्तलायाः प्रियवस्तूनां प्रियजनानां च अवर्णितां कुत्रचिद् अवस्कन्नां दशामपि लोकसमक्षम् आनयति, यथा-

कण्वपुत्र्या उदन्तं स्मरन्तश्शुचाः
सन्दिहन्त्येणकाः स्यन्दने स्यन्दने10 ।।

अभिराजस्य एवंविधं चिन्तनं विविधैः अभिनवस्पर्शैः समं नैककाव्यानां प्रणयनाय सङ्केतरूपमपि वर्तते । कवेः एवंविधं चिन्तनमेव काव्यान्तरं जनयति । शकुन्तलायाः दुष्यन्तद्वाराकृतपरित्यागवृत्तं निशम्य इदानीम् आश्रमस्था मृगाः प्रतिस्यन्दनं शङ्कन्ते यत् कश्चन जनो भूयोऽपि आश्रमं प्रविश्य अन्याम् अनूढाम् अनुसूयां प्रियंवदां वा कन्यां वञ्चयितुं न शक्नुयात् !, मन्ये अभिराजकाव्यरचनानन्तरं कण्वाश्रमस्य मृगाणां स्थितिः शकुन्तलायाः परित्यागात् परं- 'विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा' इतिवत् नास्ति, इदानीं तु मृगाः प्रतिरथं सन्दिहाना वर्तन्ते । वस्तुत उक्तकाव्यमिषेण कविना अभिराजेन आधुनिकसमाजस्य दशा चित्रिता वर्तते । अधुना यदि काऽपि कन्या केनापि प्रवञ्चिता दुर्व्यवहृता च भवति तर्हि तद्गृहजनाः सर्वस्मिन्नपि वस्तुनि शङ्कन्ते ।

अस्माकं काव्यपरम्परा इयती विशाला वर्तते यदत्र कोऽपि भावः अवर्णितो नास्ति । सर्वोऽपि भावः प्राक्तनैः कविभिः वर्णित एव । आनन्दवर्धनाचार्यमते कवीनां कथनप्रकारे किञ्चिद् नावीन्यं अन्तरं वा भवति-

दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः 11।।

इति धिया अभिराजस्य गलज्जलिकायां केचन प्राचीना भावाः शब्दान्तरेण व्यक्ता वर्तन्ते, यथा-

अज्ञातहृत्सु वैरी भवति स्मरोत्सवः ।
हृदयं ततः समर्पय बन्धो शनैः शनैः12 ।।

अत्र महाकविकालिदासस्य 'अतः परीक्ष्य कर्तव्यं विशेषात् संगतं रहः'13 इति भावो गलज्जलिकायां व्यक्तिं प्राप्तो वर्तते । यदि कोपि पाठक उक्तगलज्जलिकां पठति तर्हि पठनसमकालमेव कालिदासस्य स्मरणमपि जायते, येन द्विधानन्दप्राप्तिः तस्य भवति, तथा च गलज्जलिकापठनेनैव पाठकस्य मनसि अभिज्ञानशाकुन्तलस्य तत्प्रकरणं सद्य एव स्फुरति ।

अभिराजकाव्ये भावानामुपस्थानं बहुभिः प्रकारैः कृतं वर्तते । अभिराजकाव्ये केषाञ्चन भावानां प्रथमावतारोऽपि जातो वर्तते । यथा-

विहाय श्मसाने न मां निस्सरन्ताम् ।
उरः स्पन्दतेऽद्यापि मे मन्दमन्दम्14 ।।

अत्र कविः तं जनं वर्णयति यं जीवन्तमेव श्मसानभूमौ त्यक्त्वा आत्मीया जनाः पलायमाना वर्तन्ते । किन्तु अस्यां कवितायां मन्ये 'श्मसान' इति पदं प्रतीकात्मकं वर्तते । वस्तुत उक्तकवितामाध्यमेन कस्यचिद् वृद्धस्य दशा चित्रिता वर्तते । अद्यत्वे व्यस्तमये कपटच्छलदम्भबहुले नीरसे समाजे वृद्धस्य सेवार्थं कस्यचित् पार्श्वे समयो नास्ति, फलतः तत्पुत्राः तं वृद्धाश्रमं नयन्ति । अतः प्रस्तुते उदाहरणे तादृशम् आचरन्तं स्वपुत्रं कोऽपि पिता सकरुणं प्रार्थयते । अत्र पितुः कृते वृद्धाश्रमः श्मसानमेव । भारतीयपरम्परायां पितरं मरणान्तं यावत् पुत्रो रक्षति, यदा पुत्रः स्वपितरं वार्धक्याद् वृद्धाश्रमं नयति तदा स्वपुत्रस्य तादृशाचरणे पिता स्वमृत्युमेव चिन्तयति । मन्ये कविवरेणाऽभिराजराजेन्द्रमिश्रेण अस्यां कवितायां कथनस्य संवेदनाप्रकटनस्य कश्चन नवीनः प्रकार आश्रितो वर्तते ।

अभिराजः कुत्रचित् चिरसञ्चितां लोकमान्यताम् आधारीकृत्याऽपि काव्यं रचयति, यथा-

स्फुरति वामनयनं किं भविता श्वः समुदेष्यति नो वा सविता ।
मार्गमतिक्रामति मार्जारी पश्य परेद्युर्भुवि किं घटिता15 ।।

एवम् अस्माभिः द्रष्टुं शक्यते यद् अभिराजराजेन्द्रस्य कवितासु भावस्य अनेकविधा वर्णाः विद्यन्ते ।

पादटिप्पणयः

1 लेखकेन विरचितम्
2 श्रुतिम्भरा, पृ.सं. 30
3 कनीनिका, भूमिका, पृ.न.15
4 औदुम्बरी पृ.सं. 28
5 हविर्धानी पृ.सं.26
6 औदुम्बरी पृ.सं.86
7 औदुम्बरी पृ.सं.30
8 अभिज्ञान शाकुन्तलम्, प्र.अ. श्लो. सं. 14
9 अभिज्ञान शाकुन्तलम्, च.अ. श्लो. सं. 11
10 हविर्धानी, पृ. सं. 22
11 ध्वन्यालोकः, च.परि.का.सं.4
12 मत्तवारिणी पृ.सं.38
13 अभिज्ञानशाकुन्तलम्, प.,अं., श्लो.,सं.,24
14 हविर्धानी पृ.38
15 मत्तवारिणी पृ.सं.108

**पाठकानां कृते सूचनाः-**
**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**
**Sanskrit samvad,**
**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar, Delhi-110053**
**IFC Code- IOBA0002249**

# सम्पादकीयम्

मान्याः अमरवाणीप्रणयिनः!

'प्रजानां विनयाधानाद्रक्षणाद् भरणादपि
स पिता पितरस्तेषां केवलं जन्महेतवः।'

इति विजानन्त्येव सुविज्ञा भवन्तो भवत्यो यत् कुत इदमुद्धृतमस्ति। अस्तु, विज्ञानामपि स्मृतिपुष्ट्यर्थम् अविज्ञातमहाकविपद्यानामपि विज्ञापनार्थं विज्ञापयामि। आसीत् पुराकाले देशे 'राजतन्त्रं' यत्र राजान एव शासका भवन्ति स्म। ते पुत्रवत् प्रजापालनं कुर्वन्तः सम्मानभाजो भवन्ति स्मेति विजानाति वसुधा। कालान्तरे अस्मिन् राजतन्त्रे महानपातितो दोषः, येन राजतन्त्रं दूरीकृतमिति। किन्तु महाकविः कालिदासो वर्णयति नृपतिं दिलीपमुपर्युक्तपद्येन। असौ ब्रवीति यत् राजा दिलीपः प्रजानां सर्वविधं कल्याणं सहयोगं वा करोति स्म। तासां प्रजानां पालनं, रक्षणं, शिक्षणं चेति सर्वमपि राज्ञः कर्तव्यमासीत्। तासां जन्मदातारः पितरस्तु केवलं नाममात्रेण पितृपदवाच्या भवन्ति स्मेति। हन्त! गतस्स कालः!

श्रूयतां लोकतन्त्रं पुराकाले अपि आसीदेव। राजानः स्वसभायां प्रजानामभियोगश्रवणं तन्निर्णयं च मन्त्रिभिस्साकं विचार्य कुर्वन्ति स्म। पठन्तु अभिज्ञानशाकुन्तलं यत्र 'अविश्रमः अयं लोकतन्त्राधिकारः' इति वाक्येन लोकतन्त्रशब्दः श्रूयते। किन्तु राज्ञः पुत्र एव राजा भविष्यति, असौ दुर्जनो वा स्यात् सज्जनो वा स्यात् इति विचिन्त्य प्रजाभिः निर्वाचनप्रक्रियया शासकश्चीयते। हन्त! अत्रापि राज्ञः पुत्रा इव नेतुः पुत्राः भ्रातरो गृहसदस्याः सम्बन्धिन एव चीयन्ते इति तु पुना राजतन्त्रसमागम एव मन्तव्यः। अतः प्रजा चिन्तयेत् किं कार्यं किं चाकार्यं, को देशे शासको भवेत् को वा न भवेत्। मम विचारेण तु यस्मिन् गुणाः शासकस्य भवेयुस्स एव भूयाच्छासक इति लोकतन्त्रस्य पावनत्वम्। सप्तदशलोकसभाया निर्वाचनमस्मिन् मासे पूर्णतां गच्छति इति विज्ञाय भारतीयास्माकं जनता आशान्विता वर्तते यत् नृचितः शासकः नूनमेव देशस्य समृद्धिं करिष्यतीति भाषमाणा देशस्य सर्वविधकल्याणं कामयमानाहम् आशां करोमि यत् जनताचितः सर्वकारः संस्कृतस्यापि विकासाय महत्त्वपूर्णं कार्यं करिष्यतीति।

महाकवेर्भरतवाक्यं श्रावयामि–

प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिर्महती हीयताम्।

इति अमरवाणी विजयताम्

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**पञ्चमोऽनुवाकः [18]अथ नवर्चस्य अष्टादशस्य सूक्तस्य काण्वो मेधातिथिः ।**

**ऋषिः । 1-3 ब्रह्मणस्पतिः; 4 बृहस्पतीन्द्रसोमाः; 5 बृहस्पतिदक्षिणे; 6-8 सदसस्पतिः; 9 सदसस्पतिनाराशंसौ । च देवताः; 1 विराङ्गायत्री; 2, 7, 9 गायत्री; 3, 6, 8 पिपीलिकामध्यानिवृद्गायत्री; 4 निवृद्गायत्री; 5 । 7 पादनिवृद्गायत्री च छन्दः । षड्जः स्वरः ॥**

अब अठारहवें सूक्त का आरम्भ है। उसके पहले मन्त्र में यजमान ईश्वर की प्रार्थना कैसी करे, इस विषय का उपदेश किया है–

**सोमानं स्वरणं कृणुहि ब्रह्मणस्पते ।**
**कक्षीवन्तं य औशिजः ॥1॥**

अर्थ-इस मन्त्र में वाचकलुप्तोपमालङ्कार है। जो कोई विद्या के प्राश में प्रसिद्ध मनुष्य है, वही पढ़ानेवाला और सम्पूर्ण शिल्पविद्या के प्रसिद्ध करने योग्य है, क्योंकि ईश्वर भी ऐसे ही मनुष्य को अपने अनुग्रह से चाहता है।

फिर वह ईश्वर कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है ।

**यो रेवान् यो अमीवहा वसुवित् पुष्टिवर्धनः।**
**स नः सिषक्तु यस्तुरः ॥2॥**

अर्थ-जो मनुष्य सत्यभाषण आदि नियमों से संयुक्त ईश्वर की आज्ञा का अनुष्ठान करते हैं, वे अविद्या

आदि रोगों से रहित और शरीर वा आत्मा की पुष्टिवाले होकर चक्रवर्ती राज्य आदि धन तथा सब रोगों को हरनेवाली ओषधियों को प्राप्त होते हैं ॥ 2 ॥

अगले मन्त्र में ईश्वर की प्रार्थना का प्रकाश किया है

**मा नः शंसो अररुषो धूर्तिः प्रणङ् मर्त्यस्य।**
**रक्षा णो ब्रह्मणस्पते ॥ 3॥**

अर्थ-किसी मनुष्य को धूर्त, अर्थात् छल-कपट करनेवाले मनुष्य का सङ्ग न करना तथा अन्याय से किसी की हिंसा न करनी चाहिए, किन्तु सब की न्याय ही से रक्षा करनी चाहिए।। 3 ।।

अगले मन्त्र में इन्द्रादिकों के कार्यों का उपदेश किया है–

# सोमस्य स्वरूपादिविवेचनम्

-अभिनवकुमारः
शोधच्छात्रः, वेदविभागः,
का.सिं.द.सं.वि.वि. दरभंगा, बिहार

अयं सोमयागः सर्वं सोमयागप्रकृतिभूत इत्युक्तम्। अत एवास्मिन् सोमयागे सर्वतोभावेनावगते सर्वेऽप्येतदुपरितना क्रतवः प्रायशोऽवगता भवन्ति। अत एतत्परिज्ञानं नितरामावश्यकमुपरितनान् क्रतून् जिज्ञासूनाम्, अन्येषां च सोमयागस्वरूपमधिजिगमिषताम्। अतो यद्यप्यस्य स्वरूपं सर्वांशेन निरूपयितुमस्त्यपेक्षा आवश्यकता च, तथाऽपि विस्तरभयान्नात्र सर्वे तदीया पदार्था निरुप्यन्ते।

ते च तत्प्रकरणस्थसूत्रावलोकनेन यथावदधिगन्तुं शक्यन्त एव शेमुषीमताम्। अत्र तु प्रधानभूताः परं केचन पदार्थाः सङ्गृह्यन्ते सुखावबोधार्थम्। ते यथा–

सर्वादौ वसन्ते यस्मिन् कस्मिन् पुण्याहे आभ्युदयिकपूर्वं प्रारम्भः। प्रायशः शुक्लैकादश्यां प्रारभ्य पूर्णिमायां समापनमिति सम्प्रदायः। आभ्युदयिकानन्तरम् ऋत्विग्वरणम्। तत्र सोमप्रवाकनामानम् ऋत्विजं प्रथमतो वरणं विधेयम्। वृतः सोमप्रवाकोऽध्वर्युरादीनां गृहं गत्वा तान् ब्रूते- अमुकशर्म्मणो यज्ञो भविष्यति तत्र भवताऽऽर्त्विज्यं कर्तव्यमिति।

तेन च अध्वर्य्वादिना आधानादिषु के ऋत्विजोऽभूवन्। ते च कुत्र गताः, किमर्थम् अस्मान् इदानीं मृगयसे, अपि ब्रूय तैः सह यजमानगृहमागच्छेत्। आगतेषु तेषु तान्वृणीते।

वृतेभ्यो ऋत्विग्भ्यो मधुपर्कदानम्। एतावद् गृहे कृत्वा ततोऽग्नीन् समारोप्य यत्र सोमेन यक्ष्यन् स्यात् तं देशं गच्छेत्, गत्वा च तत्र शालां विमितं वा निर्माय तत्र वितानं साधयित्वाऽरणी मथित्वा तत उत्थितानग्नीन् तत्तत्कुण्डेषु स्थापयेत्। अपराह्णे दम्पत्योरभीष्टभोजनं न वा।

अस्मिन्नेव दिने अनयोर्भोजनं, ततश्चतुर्ष्वदिनेषूपवास एव। अवभृथानन्तरमेव पुनरनयोरभीष्टभोजनम्। ततश्चतुर्षु दिनेषूपवास एव। मध्ये तु व्रतप्राशनमेव यावदुक्तम्। ततो वपनं यजमानस्य। ततः स्नानम्, ततो दीक्षणीयेष्टिः– तत्राग्नावैष्णव एकादशकलापः पुरोडाशो द्रव्यम्, अग्नाविष्णुदेवता। इष्ट्यन्ते नवनीतेन दम्पत्योः शिरस आरभ्य पादपर्यन्तमभ्यञ्जनम्। ततस्तयोर्मुष्टिबन्ध नम्।

तत्र बन्धनकाले हस्तद्वयेऽपि सर्वा अङ्गुलीर्बद्ध्वा ततोऽङ्गुष्ठप्रदेशिन्यौ विसृजेताम्, इतराबद्धा एव वस्त्रादिना भवेयुः।

अतः परं सोमलतायाः स्वरूपादिवर्णनं समीक्षणञ्चास्मिन् सन्दर्भबिन्दुमपरि अग्निष्टोमयागे सम्यक् अनुरूपमानुपूर्विकेऽस्मिन् विवेचने दृष्टिपातं कृत्वा यागसमीक्षणमभिरान्धामि।

सोमलतां निकषा प्रस्थानाय घण्टानादं शंखध्वनिना सह नानावाद्यानुवाद्यं घोषयन् उत्सवसमं वातावरणं निर्माय ब्रह्मयजमानौ दक्षिन क्रमो तत् पश्चाच्च पत्नी चोपविश्य(शकटे) सोममालभन कार्यं कर्तुं सोमस्य तुष्ट्यै मन्त्रान् पठेत् यजमानः, पाठयेत् तु ब्रह्मा अध्वर्युः प्राङ्मुखमुपविश्य मन्त्रपाठे साहाय्यं व्यवहरेत्–

"ओं अस्माकोऽसि शुक्रस्ते ग्राह्यो विचितस्त्वा विचिन्वन्तु।।

ओं एष ते गायत्री भाग इति मे सोमाय ब्रूयात्।

ओं एष ते त्रैष्टुभो भाग इति मे सोमाय। ओं एषते जागतो भाग इति मे सोमाय। ओं छन्दोनामानांᳫसाम्राज्यं गच्छेति मे सोमाय इति ब्रूतात्।।

ततोत्तरत प्रतिप्रस्थाता प्राङ्मुखोऽध्वर्युः सोममालभेत् मन्त्रं पठित्वा।

अतः परं सोमविक्रयी सोमं नावखण्डयेत्। एके सोममध्ये पतितानां तृणकाष्ठादीनां निरस्न् मत्रेच्छन्ति।

सोमोपनहनं द्विगुणं चतुर्गुणं वा कृत्वा यथा तस्य दशा प्राची उदीची वा भवेत् तथा तत् चर्मणि स्तृणीयात्।

सोमोपनहने वाससि दशकृत्वाः सोममें प्रक्षिपेदध्वर्युः। दशसु मन्त्रः। तूष्णीमेकादशम्।

द्वितीयादिप्रक्षेपेषु अङ्गुष्ठमारभ्य क्रमशः एकैकामङ्गुलिमुत्सृजेत्। अर्थात् द्वितीयः प्रक्षेपोऽङ्गुठवर्जिताभिश्चतसृभिरङ्गुलिभिः तृतीयोऽङ्गुष्ठतर्जनीवर्जिताभिश्चतसृभिः, चतुर्थोऽङ्गुष्ठानामिकाकनिष्ठिकाभ्यामिति।

तत्र पञ्चमः प्रक्षेपः केवलं कनिष्ठिकयैव कर्तव्यः। सप्तमादिदशमान्तः प्रक्षेप एकैकस्या अङ्गुल्या उपचयं कृत्वा कर्तव्यः। अर्थात् सप्तमो विप्रक्षेपोऽनामिकोपचितया कनिष्ठिकया, अष्टमः कानिष्ठिानामिकामध्यमाभिः, नवमः प्रदेशिन्यादिचतसृभिः, दशमः साङ्गुष्ठाभिः सर्वाभिरङ्गुलिभिरिति।

दशमः प्रक्षेपोऽजलिना कर्तव्यः। प्रसारितो हस्तः प्रसृतिः। प्रसृतिद्वयमंजलिः वा अवधारणं। दशमप्रक्षेपादन्यत् एकादशः प्रक्षेपोऽजलिना कार्यो, न दशमः। कुतः? अध्यावापश्रुतेः। "एतया" इत्यादिनासर्वाभिरङ्गुलिभिः पृथक्-पृथक् दशकृत्वः प्रक्षेपः तं विधाय ततोऽधिकस्य एकादशस्य प्रक्षेपस्य "समस्यांजलिनाऽध्यपति" इति विधानादित्यर्थः। अध्वर्युरास्तीर्णस्य प्रक्षिप्तसोमकस्य सोमापनहनवाससोष्णीषेण बध्नीयात्। बन्धनानन्तरं सोमोपनहनस्यान्तानां मध्येऽङ्गुल्याछिद्रं करोति वायुप्रवेशाय। तं बद्धं सामम्।

अध्वर्युः पञ्चवारं सोमं पणते। पणनं च न्यूनेन मूल्येन विक्रेतुः प्रार्थनम्।

'स आह सोमविक्रयिन् क्रय्यस्ते सोमो राजा इति।
क्रय्य इत्याह सोमविक्रयी।।
'तं वै ते क्रणानीति'।।
'क्रीणीदीत्याह सोमविक्रयी।।
कलया ते क्रणानीति'।।

ततोऽध्वर्युः ब्रूते- एवं पृष्टः सोमविक्रेता क्रय्य इति प्रत्याह। अध्वर्युरनुज्ञां प्रार्थयेत्। पुनर्ब्रूते- कला तु गौः षोडशी भागः। गौः षोडशेन भागेनेत्यर्थः। कला तु जङ्घया अधोभाग इति रुदत्तः।

'भूयो वा अतः सोमो राजार्हतीत्याह सोमविक्रयी अध्वर्युण कलया मूल्येन सोमं प्रार्थितो विक्रयी 'भूयो वा अत इत्याद्यध्वर्यु प्रत्याह। अतो भवदुक्तकलातो मूल्यान्ममसोमो राजा अतिशयेन बहुमूल्यार्हति।

सोमविक्रयिणाध्वर्युम्प्रति भूयो वा अत इत्येवमुक्ते सति अध्वर्युस्तम्प्राह भूय एव इत्यादि। सत्यं यत् मदुक्तान्मूल्यात्त्व सोमो राजा बहुत्तरमेव मूर्हति।

सत्यं यत् यदुक्तान्मूल्यात्त्व सोमो राजा बहुतरमेव मूल्यमर्हति। परन्तु गोरपि महिमा महानेव। यतो गोः प्रतिधुगित्यादि। प्रतिधुक् धारोष्णं पयः, शरो दुग्धमण्ड।

"भूय एवातः सोमो राजार्हति महाँस्त्वेव गोर्महिमेत्यध्वर्युर्गोर्वै प्रतिध क्तस्यै ऋतं, तस्या आभिक्षा, तस्यै वाजिनमिति।

सोमविक्रयिणाध्वर्युम्प्रति भूयो वा अतः इत्येवमुक्ते सति अध्वर्युस्तदाह- तम्प्रति ब्रूते पुनः- भूयो वा अतः भूय एव इत्यादि। सत्यं यत् गदुक्तान्मूल्यात्त्व सोमो राजा बहुतरमेव मूल्यमर्हति। परन्तु गोरपि महिमा महानेव। यतो गोः प्रतिधुगित्यादि। प्रतिधुक् इति।

भूय एवेत्यतप्रभृति चतुरावर्तयति।

एकैकं नान्ते पणते शफेन, पदाऽर्द्धेन,

गवा। ते क्रीणामीत्यन्ततः।

प्रश्नान्ते प्रश्नान्ते चेति। एवमुक्त्वाऽध्वर्युः पुनः शफेन पणते। एवं यदा पदा, अर्द्धेन च पणते। तत्र सर्वत्राप्यन्ते ते क्रीणानीत्यनुषजते। शफेन ते क्रीणामि, पदा ते क्रीणामि, अर्धेन ते क्रीणामीति। सोमक्रयिणा च भूयो वा अत' इत्याद्युक्ते भूय एवेत्यादिकमध्वर्युः पठति। एवमेकैकस्य प्रश्नस्यान्ते उक्त्वा ततोऽत्यन्तपणनं गवा ते क्रीणानि' इति कुर्यात्। एवं च भूयो वा इत्यस्य विक्रेत्रा वारचतुष्टयं पठनं कुर्यात् उच्चारणञ्च कुर्यादित्यर्थः। तत् प्रश्नस्यान्ते भूय एवेत्यस्याध्वर्युणापि वारचतुष्टयं पठनं गवा ते क्रीणीत्यतः पूर्वमिति फलितम्। शफः खुरः। चतुर्थांशः पत् पादः। अर्द्धं तु स्पष्टम्। शफेन द्वितीयं पणनम्, पदा तृतीयम्। अर्द्धेन चतुर्थम्। गवा पञ्चममिति।

'क्रीतः सोमो राजेत्यन्ते वयाᳫसि प्रब्रूहि- इत्याह-

सोमविक्रयी- अन्त्यपणनानन्तरं

सोमविकयिणा वक्तव्यो मन्त्रोऽयम्।

पञ्चकृत्वः पणमानः सोमविक्रयी, क्रीतासो रामा, वयांसि- अन्यान् पशून् प्रब्रूहि इत्येवाध्वर्युः ब्रूयादेव।

बक

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रियन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखज्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# वाल्मीकिरामायणे यज्ञव्यवस्था



-विद्यावाचस्पतिः डॉ० सुन्दरनारायणझाः
सहायक-आचार्यः, वेदविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्,
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16

एतत्तु सर्वैरप्यस्माभिर्विज्ञायत एव यद्रामायणमादिकाव्यं वाल्मीकिश्चादिकविरिति। काव्यस्यास्य श्रुतिपरम्परानुपालनात्मकमभिनवं स्वरूपमवलोक्यैव भगवता श्रीकृष्णद्वैपायनेन पुराणानि महाभारतादिकञ्च निरमायि तदेतदुद्धरणमुपलभ्यते बृहद्धर्मपुराणे। यथा-

रामायणे पाठितं मे प्रसन्नोऽस्मि कृतस्त्वया।
करिष्यामि पुराणानि महाभारतमेव च ।।

इत्यस्माद् व्यासवचनादिदन्तु सुसिद्धमेव यद्रामायणकथामाश्रित्यैव भगवता व्यासेन पुराणेषु श्रौतपरम्परानुकूलव्यवहारादिकं कथाब्याजेन प्रतिपादितमिति। नाना पुराणेषु रामायणमाहात्म्यं गीतमस्ति। श्रीस्कन्दपुराणस्योत्तरखण्डो नारदसनत्कुमारसंवादात्मको रामायणमाहात्म्यवर्णनात्मको वर्तते। एवमेवान्येष्वपि पुराणेषु तादृशमनेकविधमुद्धरणं समुपलब्धं भवति यथा-

रामायणमहं वक्ष्ये नारदेनोदितं पुरा।
वाल्मीकये यथा तद्वत् पठितं भुक्तिमुक्तिदम्।।

एभिरुपर्युक्तैरुद्धरणैरिदं सुस्पष्टमेव प्रतिभाति यद्रामायणं पुराणादिभिः प्राचीनमस्तीति। तस्मादेव कारणादाचार्यैः रामायणस्योपजीविकाव्यत्वेनान्येषाञ्च काव्यानामुपजीव्यत्वेन स्तुतिर्विहिता।। अतः प्रसङ्गादिह वाल्मीकेः संक्षिप्तः परिचयः समुपस्थाप्यते।

महर्षेर्वाल्मीकेः संक्षिप्तपरिचयः-

आदिकाव्यस्य रामायणस्य रचयिता श्रीमद्वाल्मीकिर्विख्यातोऽस्त्यादिकविरूपेण सर्वत्र जगति। स चायं कविः महर्षेः प्रचेतसः पुत्र आसीदिति स्वयमनेन रामायणस्योत्तरकाण्डस्य षण्णवतितमे सर्गे श्रीरामाय निवेदितम्। यथा- प्रचेतसोऽहं दशमः पुत्रो राघवनन्दन। स्कन्दपुराणे वैशाखमाहात्म्यप्रसङ्गे वर्णितमस्ति यदयं मुनिर्जन्मान्तरे व्याध आसीत्ततोऽपि प्राक्तने जन्मनि स्तम्भनामा श्रीवत्सगोत्रो ब्राह्मण आसीत्। व्याधजन्मनि शङ्खमुनेः सङ्गाद् रामनामजपेन जन्मान्तरेऽयमग्निशर्मा (मतान्तरेण रत्नाकरनामा) ब्राह्मणोऽभूत् तदानीमेवास्य पिता महर्षिः प्रचेता अभूदित्यनुमीयते। तत्रापि वने व्याधसङ्गात् पूर्वजन्मसंस्कारवशाच्च व्याधकर्मण्येवायं कियन्तं कालं यावत् संलग्न आसीत्। तदनु सप्तर्षिसङ्गात् मरा मरा इति जपित्वा तपःकाले वल्मीकावृतदेहत्वात् वाल्मीकिरिति ख्यातिं गतः। कथेयं रामचरितमानसे, अध्यात्मरामायणे, आनन्दरामायणे, भविष्यपुराणे च किञ्चिद्भेदेन वर्णिताऽस्ति। एतेनास्य ब्राह्मणत्वं सुस्पष्टं भवति निम्नजातितां प्रख्यापयतां विदुषां चिन्तकानाञ्च विचाराः खण्डिता भवन्ति। यथोक्तं भगवतो वाल्मीकेः पिता प्रचेता आसीदिति तत्र प्रचेतेति पदस्यार्थो भवति प्रकृष्टज्ञानः। शुक्लयजुर्वेदीय- माध्यन्दिनसंहिताया: पञ्चमेऽध्याये एकविंशतितमे मन्त्रे- श्वात्रोऽसि प्रचेताः (5/21) इति मन्त्रांशो लभ्यते। अस्य मन्त्रस्य भाष्यं कुर्वता श्रीमन्महीधराचार्येणोक्तं यत्- शु क्षिप्रमतीति श्वात्रो मित्रः, प्रकृष्टं चेतो ज्ञानं यस्य स प्रचेताः वरुणः तद्रूपोऽसि इति। अनेनेदं सुव्यक्तं भवति यत्प्रचेत इति नाम्ना वरुणो विख्यातोऽस्ति श्रौतशास्त्रेषु। कश्यपादितीभ्यां वरुणः (आदित्यः) समभवत्। वरुणस्य पत्नी चर्षणी इत्यासीत्। भृगुर्वै वारुणिः पितरं वरुणमुपससार। इत्युपनिषद्वचनात् वरुणस्य पुत्रो भृगुर्नाम ऋषिरासीत्। सोऽयं भृगुरस्य प्राचेतसोर्वाल्मीकेरग्रजो भ्राता आसीदित्यपि सिद्धमेव। उग्रतपस्याकारणात् ब्रह्मचिन्तनवशाच्च देहाध्यासाभावस्तस्य महर्षेः प्रसिद्धस्तस्मात् तस्य शरीरं वल्मीकैराच्छादितमिति वल्मीकादुत्थितस्तस्माद्वाल्मीकिरिति प्रसिद्धिरस्ति।

महर्षिणा वाल्मीकिना मर्यादापुरुषोत्तमस्य परब्रह्मणः साक्षादवतारस्य भगवतः श्रीरामस्य चरित्रमनुसृत्य यदिदं काव्यं सर्जितं तद्रामायणं नाम महाकाव्यं श्रुतिस्मृत्युदितं सकलमप्यनुष्ठानवर्णनपुरस्सरं विविध गुणगौरवशालिपरम्परापोषणतत्परं सत्यत्युत्कृष्टं वर्तते। रामायणीयकथासु विविधयज्ञानुष्ठानानां वर्णनान्युपलभ्यन्ते तेषामत्र संक्षेपेण वर्णनं कर्तुं प्राप्तप्रसङ्गादिह यज्ञशब्दार्थविचारः क्रियते।

यज्ञशब्दार्थविचारः-

यज्ञशब्दो धर्मार्थे प्रयुज्यते। तदुक्तं लौगाक्षिभास्करेणार्थसङ्ग्रहे- यागादिरेव धर्मः इति। यज्-धातोर्निष्पन्नस्यास्य यज्ञशब्दस्य महत्त्वं प्रतिपादयता भगवता योगीश्वरयाज्ञवल्क्येनोक्तं शतपथब्राह्मणे- यज्ञो वै श्रेष्ठतमं कर्म इति। तथा चावादि श्रीकृष्णो गीतायां- यज्ञः कर्म समुद्भवः इति।

वस्तुतो यज्ञास्तु श्रौतस्मार्तभेदेन द्विविधो वर्तते। तत्र श्रुतिप्रतिपादिता ये यज्ञास्ते श्रौतयज्ञा इत्युच्यन्ते। स्मृतिप्रतिपादिताश्च यज्ञाः स्मार्त्ता इति। गोपथब्राह्मणे सप्तपाकयज्ञसंस्थाः, सप्तहविर्यज्ञसंस्थाः, सप्त च सोमयज्ञसंस्था इति यज्ञानामेकविंशतिः संस्था उक्ताः। तत्र पाकयज्ञास्तु स्मार्त्तयज्ञास्सन्ति, हविर्यज्ञास्सोमयज्ञाश्च श्रौतयज्ञा इति।

श्रौतयज्ञानामनुष्ठानार्थं सर्वप्रथममग्न्याधानं विहितं वर्तते। आधानं त्रिविधं प्रोक्तं होमपूर्वाधानम्, इष्टिपूर्वाधानम्, सोमपूर्वाधानञ्च। तेन श्रौतयज्ञानां होम-इष्टि-सोमभेदेन त्रिविधत्वं प्रतिपादितं भवति। सर्वेषामपि होमानां प्रकृतिरग्निहोत्रम्, सर्वासामपीष्टीनां प्रकृतिर्दर्शपूर्णमासौ, सर्वेषां सोमयागानां प्रकृतिरग्निष्टोमश्चोक्तः। तेषु सर्वेष्वपि यागेषु सोमयागस्य महत्त्वमत्युत्कृष्टं वर्तते। सोमश्चाप्येकाहाहीनसत्रसाद्यस्क्रभेदाच्चतुर्विधं उक्तः। यस्मिन् यागे एक एव सुत्यादिनं भवति स एकाहः, द्व्यहादारभ्य द्वादशाहपर्यन्तमहीनाः, द्वादशाहादारभ्य सहस्रसंवत्सरपर्यन्तमनुष्ठेयो यागः सत्रमुच्यते तथा यत्र एकस्मिन्नेवाह्नि सर्वमपि क्रियाकलापं समाप्तिमेति स यज्ञः साद्यस्क्र इत्युच्यते। ये केऽप्यग्निष्टोम-वाजपेय-राजसूय-चयन-पुरुषाश्वगोव्यजादयो पञ्चमेधयज्ञाः प्रोक्तास्ते सर्वेऽपि सोमान्तर्गता एव सन्ति। वैदिकसाहित्ये पौराणिककथासु च राजसूयाश्वमेधादीनां वर्णनं प्रचुरमात्रायामुपलभ्यते। वाल्मीकिरामायणस्यारम्भे महाराज्ञा दशरथेनानुष्ठितस्याश्वमेधस्य श्रीरामेणानुष्ठितस्याश्वमेधस्य चैवमुक्तप्रकारेणान्येषामपि विविधयज्ञानां वर्णनानि सन्ति। तेषामिह संक्षेपेण निदर्शनं क्रियते।

वाल्मीकिरामायणे यज्ञव्यवस्था-

श्रीमद्वाल्मीकिविरचिते रामायणे विविधयज्ञानां प्रसङ्गाः समागतास्सन्ति। तत्रादौ बालकाण्डस्याष्टमसर्गादारभ्य चतुर्दशसर्गपर्यन्तं महाराज्ञा दशरथेनाश्वमेधस्य साङ्गोपाङ्गमनुष्ठानम्, पञ्चदशसर्गे ऋष्यशृङ्गेण राज्ञो दशरथस्य पुत्रेष्टियज्ञः, त्रिंशत्तमे सर्गे श्रीरामकर्तृकं विश्वामित्रयज्ञस्य संरक्षणम्, सप्तपञ्चाशत्तमसर्गादारभ्य षष्टितमसर्गपर्यन्तं त्रिशङ्कोर्यज्ञवृत्तान्तम्, युद्धकाण्डस्य द्व्यशीतितमे सर्गे इन्द्रजिता निकुम्भिलामुपेत्य यज्ञस्यानुष्ठानम्, उत्तरकाण्डस्य पञ्चविंशति सर्गे यज्ञैर्मेघनादस्य साफल्यवर्णनम्, नवतितमे सर्गे अश्वमेधेनेलायाः पुरुषत्वस्य प्राप्तिः, एकनवतितमसर्गादारभ्य त्रयोनवतिसर्गं यावच्छ्रीरामस्यादेशेनाश्वमेध यज्ञस्यायोजनवृत्तान्तवर्णनञ्च वर्णितम्। एवमुक्तप्रकारेण बहुविधानां यज्ञानां वर्णनमत्र रामायणे भगवता वाल्मीकिना कृतम्। सर्वेषामपि यज्ञानामाधारोऽस्ति श्रौतयज्ञ एवातो रामायणस्य श्रौतीपरम्परानुप्राणितत्वं सुसिद्धं भवति। नात्र लघुनिबन्धे उपर्युक्तानां सर्वेषामपि रामायणोपवर्णितानां यज्ञानां साङ्गोपाङ्गं वर्णनं कर्तुं शक्यते तस्माद्राज्ञा दशरथेनानुष्ठितस्याश्वमेधयागस्य श्रौतग्रन्थेषु प्रतिपादितेनाश्वमेधेन सह कथं साम्यमिति दृष्ट्या चिन्तनं विधातुमहमुत्सहे।

राज्ञा दशरथेनाश्वमेधयज्ञस्य साङ्गोपाङ्गमनुष्ठानम्-

श्रीमद्वाल्मीकिविरचितरामायणस्याष्टमे सर्गे पुत्रप्राप्त्यर्थं मन्त्रिभिस्सह मन्त्रणां कुर्वता राज्ञा दशरथेनाश्वमेधेन यक्ष्यामीति प्रस्तावपुरस्सरं सङ्कल्पग्रहणं कृतमिति वृत्तान्तं वर्णितमस्ति। यथा-

तस्य चैवंप्रभावस्य धर्मज्ञस्य महात्मनः।
सुतार्थं तप्यमानस्य नासीद् वंशकरः सुतः।।1।।
चिन्तयानस्य तस्यैवं बुद्धिरासीन्महात्मनः।
सुतार्थं वाजिमेधेन किमर्थं न यजाम्यहम्।।2।।
स निश्चितां मतिं कृत्वा यष्टव्यमिति बुद्धिमान्। मन्त्रिभिः सह धर्मात्मा सर्वैरपि कृतात्मभिः।।3।।

वस्तुतः कश्चिदपि मानवः किमपि कार्यं कर्तुं सर्वप्रथमं विचारयति। तथैवात्रापि यजमानः सर्वादौ यागमनुष्ठातुं विचारं करोति। दृढे विचारे सति सोमप्रवाकं मण्डपाद्बहिः कार्यकर्तारं ऋत्विग्विशेषमाहूय अन्वेष्य ऋत्विग्भ्यः सोमयागस्य सूचनां प्रदातुमादिशति। तदानीं सोमप्रवाको मदीयो यजमानः सोमयागमनुष्ठास्यतीति ऋत्विजां पार्श्वं गत्वा सूचयति। कात्यायनानुसारमेतत्कार्यं यजमानः स्वयमेव सम्पादयति। तदन्विहापि राजा स्वयमेव ऋत्विग्गणान् निमन्त्रयति। तद्यथा-

ततोऽब्रवीन्महातेजाः सुमन्त्र मन्त्रिसत्तम। शीघ्रमानय मे सर्वान् गुरुंस्तान् सपुरोहितान्।।4।।
ततः सुमन्त्रस्त्वरितं गत्वा त्वरितविक्रमः। समानयत् स तान् सर्वान् समस्तान् वेदपारगान्।।5।।

तदा सुमन्त्रेणाहूतान् सर्वानपि वसिष्ठादीन् द्विजोत्तमान् पूजयित्वा पुत्रप्राप्त्यर्थमहं हयमेधेन यक्ष्यामीति तेषां समक्षं न्यवेदयत्।

ततस्समाहूताः सर्वेऽपि ऋषयः द्विजा ऋत्विजश्च राज्ञो वचनं स्वीकृत्य वैदिकपरम्परानुसारं सविधियज्ञमनुष्ठातुं समुद्यता अभूवन्। ते सर्वे दशरथमुक्तवन्तो यत् यागायोचितान् सम्भारान् सम्भ्रियन्ताम्। देवयजनस्थानं निर्मातुञ्च सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम्। इत्युक्तवन्तः। तदनु राज्ञा पत्न्या सह सरय्वा उत्तरे तीरे देवयजनं निर्माय दैवज्ञैश्शोधिते शुभमुहूर्ते मातृपूजनमाभ्युदयिकञ्चानुष्ठाय प्रधानकृत्यमारब्धम्। प्रसङ्गादिह श्रौतशास्त्रेषु वर्णितस्याश्वमेधस्य विधानं संक्षेपेणोपस्थाप्यते।

अश्वमेध यज्ञस्य सामान्यपरिचयः-

अश्वमेधाख्यो यागः श्रौतयागेषु सोमान्तर्गतः कश्चन विशिष्टो यागोऽस्ति यः सर्वान् कामानवाप्तुं राजभिरनुष्ठीयते। यो हि राजैकच्छत्राधिपतिः सार्वभौमो भवति, तेनैवानुष्ठेयोऽयं यागः। यः कश्चन यजमानः साधारणो भवति न तस्यात्राधिकार इति। यज्ञोऽयं राजयज्ञ इत्यपरेण नाम्ना प्रसिद्धोऽस्ति। यद्यप्ययं सोमयागस्तथाप्यत्र सवनीयपशुरश्वः, स च महोपकारकेषु परिगणित इति कृत्वा तस्यैव नाम्ना यागोऽयम् अश्वमेध इति संज्ञां भजते। क्रतुरयं ब्रह्महत्यादिमहापातकनाशकत्वात् सर्वफलप्रद उक्तः। श्रौतग्रन्थेषु यागस्यास्य विधानमेवमुपलभ्यते-

श्रौतशास्त्रोक्तमश्वमेधयज्ञविधानम्-

शुक्लयजुर्वेदीयमाध्यन्दिनसंहिताया द्वाविंशाध्यायमारभ्यैकोनत्रिंशाध्यायपर्यन्तमश्वमेधनिरूपणमस्ति। कात्यायनश्रौत- सूत्रस्य विंशोऽध्यायोऽश्वमेधनिरूपणात्मको वर्तते। शतपथब्राह्मणस्य च त्रयोदशं काण्डमश्वमेधनिरूपणात्मकमस्ति। अन्यास्वपि शाखासु तथैवाश्वमेधस्य साङ्गोपाङ्गं निरूपणमस्ति। यागेऽस्मिन् बहवो ग्राम्या आरण्यकाश्च पशव उक्तास्तेष्वश्व एव प्रथमः प्रधानभूतश्चास्ति। योऽश्वः पायितसोमरसाभ्यां मातापितृभ्यामश्वाभ्यां जातो जातमात्र एव जलान्तरपानात्पूर्वं पायितसोमरसो भवति तमश्वं वर्धयित्वा यागाय रक्ष्यते। स चाश्वः पूर्वभागे कृष्णः, अपरभागे शुक्लः, ललाटे शकटाकारपुण्ड्रत्रयोपेतो गभीराकृतिश्च भवति।

फाल्गुणशुक्लाष्टम्यां नवम्यां वा ग्रीष्मे वा तस्यामस्यारम्भो भवति। आरम्भदिने ऋत्विग्वरणानन्तरं ब्रह्मौदनपाको भवति। पाकस्य चतुर्भ्यो महर्त्विग्भ्यो दानम्। प्रत्येकमेकैकं गवां सहस्रं चत्वारि शतमानानि च दद्यात्। सायमग्निहोत्रे हुते रात्रौ यजमानस्य चतस्रो पत्न्यः अनुचर्यश्च यजमानसमीपमागच्छन्ति। ताभिस्सह रात्रौ ब्रह्मचर्यं नियमेन पालयन् यजमानश्शेते।

उदितेऽग्निहोत्रं हुत्वा पूर्णाहुतिः। ततः पथिकृदिष्टिं कृत्वा तडागादिस्थावरजलं प्राप्याश्वं प्रोक्षेत्। ततः शूद्रद्वैश्यायां जात आयोगवः स सिध्रकवृक्षोद्भवेन मुसलेन तत्रैवैकं श्वानं प्राणैर्वियोजयति। परो मर्तः परः श्वा इति मन्त्रेण तं मृतं श्वानं अश्वस्याधस्ताज्जलमध्ये वेतसकटेन प्लावयति। ततोऽश्वमग्निसमीपमानीय दशाहुती हुत्वा अध्वर्युस्तमश्वं चतुर्षु दिग्विभागेषु उपरिष्टाच्च प्रोक्ष्य, भूपरिभ्रमणार्थमुत्सृजतीति। तेनाश्वेन सह तद्रक्षणार्थं चतुश्शता इषुधन्विनो वीरपुरुषा गच्छेयुः। सोऽश्वो यावद्भूमिं यथेष्टं परिभ्रम्य एकस्मिन् वर्षे आगच्छति तावत्तं रक्षन्ति। यदि कश्चिद्राज्ञः शत्रुरश्वं स्पर्धया मध्ये पथं गृह्णाति तदा रक्षिणस्तेन सह युध्वा अश्वं परावर्त्यानयन्ति। यदि न शक्यते पुनः पूर्ववत् तादृशमेव अश्वमेकमानीय पुनः प्रोक्ष्य रक्षिभिः सह विसर्जयति। यागस्यास्यानुष्ठाता यजमान अतिबलो भवेत्। यो हि राजा दुर्बलो भवति तस्याश्वः केनापि शत्रुणा राज्ञा वा प्रतिविसर्जनं स्वाधिकृतं क्रियते, तेनास्य यागो न कदापि पूर्णतामेष्यति तस्माद्यजमानोऽतिबलो भवेदिति श्रौतादेशः। अतो यस्सर्वान् स्वबलेनाभिभवितुं शक्नोति तेनैवायं यागोऽनुष्ठेयः। श्रिया, यशसा, जयेन च य आत्मनः श्रैष्ठ्यं प्रेप्सति, स एवात्र अधिकारीति श्रुतयः स्मृतयश्च कथयन्ति। एवं शतमश्वमेधान् यो राजा यथाविधमनुतिष्ठति स देवानां राजा इन्द्रो भवतीति।

सोऽश्वः यावत्परिभ्रम्य स्वस्थानं पुनरागच्छति तावत्

यजमानः प्रतिदिनं विष्णुक्रमान् कांश्चन होमान् कुर्वन् सायंप्रातश्च वीणागाथिनौ ब्राह्मणराजन्यौ आहूय ताभ्यां स्वापदानं गापयेत्। एवं प्रतिदिनं संवत्सरं यावत् कुर्वन् यज्ञियाश्वस्य प्रत्यागमनं प्रतीक्षमाण आसीत।

वयं जानीमो यत्सोमयागस्य विकारोऽयमश्वमेधस्तस्मादत्र षोडशर्त्विजो भवन्ति। सुत्यादिवसत्रयेण सहात्रैकविंशतिसंख्याका यूपा भवन्ति। यूपानां विषये चावादि कात्यायनः- एकविंशतिर्यूपाः। राज्जुदालो मध्ये। अभितः पैतुदारवो। षट् षट् बैल्वखादिरपालाशाः। एवंविधा यूपाश्चोत्तरवेदेरुत्तरकोणादारभ्य दक्षिणकोणपर्यन्तं स्थाप्यन्ते। तत्राहवनीयाग्ने साक्षात् पूर्वभागे यो यूपो भवति स मध्यमो यूप इत्युच्यते। स च यूपो राज्जुदाल वृक्षनिर्मित एकविंशत्यरत्निपरिमाणो भवति। तस्यैव नामाग्निष्ठयूप इति, तस्मिन्नेवायमश्वो नियुज्यते। तस्याग्निष्ठयूपस्य पार्श्वयोः द्वौ यूपौ पौतुद्रव(देवदारु)वृक्षनिर्मितौ भवतः। तदनन्तराः दक्षिणोत्तरभागयोः त्रयस्त्रयो बैल्वाः, त्रयस्त्रयः खादिराः, त्रयस्त्रयश्च पालाशा यूपाः स्थाप्यन्ते। अग्निष्ठे यूपे अश्वं नियुज्य तस्याश्वशरीरं रशनया समन्तत आवेष्ट्य अश्वशरीरे त्रयोदशपशून् निबध्नाति। एवमेव आग्नेयसारस्वतसौम्यपौष्णबार्हस्पत्यवैश्वदेवैन्द्रमारुतैन्द्राग्नसावित्रवारुणान् अग्निष्टोमोक्तान् पशून् नियोजयति। आहत्यात्रैकविंशतिर्यूपेषु एकोनपञ्चाशदुत्तरशतत्रयं ग्राम्या: पशवः। षष्ट्युत्तरं शतत्रयञ्चारण्याः पशवो नियुज्यन्ते। सुपर्णचितेर्निर्माणपुरस्सरं तदुपरि चित्याग्नेः प्रतिष्ठां कृत्वा यागस्यानुष्ठानं भवति। चितिनिर्माणार्थमिष्टकानिर्माणमपि यथाविधि कर्त्तव्यम्। अत्रेष्टकाः चयनयागोक्तेष्टकाभ्यो द्विगुणं त्रिगुणं वाधिकप्रमाणाः सप्तत्युत्तरशताधिकमेकादशसहस्रसंख्याका उक्ताः।

एवमुक्तप्रकारेण राज्ञा दशरथेन श्रौतशास्त्रसम्मतस्याश्वमेधस्यानुष्ठानं विहितमिति वाल्मीकिना स्पष्टतयोक्तं यत्- अथ संवत्सरे पूर्णे तस्मिन् प्राप्ते तुरङ्गमे। सरय्वाश्चोत्तरे तीरे राज्ञो यज्ञोऽभ्यवर्तत।। इत्येवंविधं रामायणस्य चतुर्दशसर्गे साङ्गोपाङ्गं वाजिमेधयज्ञानुष्ठानं वर्णितमस्ति। तत्र श्रौतशास्त्रेषु यान्यपि विधानान्यश्वमेधाय समुपदिष्टानि तानि सर्वाण्यपि समुल्लिखितानि सन्ति। क्रमशस्तेषामत्र संक्षेपेणोपस्थापनं कुर्वन् रामायणवाक्यानामुद्धरणं प्रस्तौमि। यथा-

अश्वमेधे महायज्ञे राज्ञोऽस्य सुमहात्मनः। कर्म कुर्वन्ति विधिवद् याजका वेदपारगाः।।2-3।।

प्रवर्ग्यं शास्त्रतः कृत्वा तथैवोपसदं द्विजाः। चक्रुश्च विधिवत् सर्वमधिकं कर्म शास्त्रतः।।4।।

प्रातःसवनपूर्वाणि कर्माणि मुनिपुङ्गवाः।।5।।

मध्यन्दिनञ्च सवनं प्रावर्तत यथाक्रमम्।।6।।

तृतीयसवनं चैव राज्ञोऽस्य सुमहात्मनः चक्रुस्ते शास्त्रतो दृष्ट्वा यथा ब्राह्मणपुङ्गवाः।।7।।

वेदपारगा ऋषयो मनीषिणस्तस्मिन् यज्ञे ऋत्विज आसन्। श्रौतशास्त्रानुसारं प्रवर्ग्ययागस्यानुष्ठानं प्रथमे सोमयागे न भवति। उपसदेव वाऽप्रवर्ग्ये इति श्रौतादेशात् यस्य यजमानस्य प्रथमः सोमयागो भवति स प्रवर्ग्यानुष्ठानं विहाय उपसदिष्टिमेवानुतिष्ठेत्। परमत्र भगवता वाल्मीकिना प्रवर्ग्यानुष्ठानं वर्णितं तेनेदं स्पष्टं भवति यद्राज्ञा दशरथेनेतः पूर्वमपि सोमयागाः समनुष्ठिता इति। अत्र प्रवर्ग्योपसदां सवनत्रयाणाञ्च श्रौतोक्तं विधानं सुस्पष्टमस्ति। न केवलमेदेवापितु श्रौतोक्तानि सर्वाण्यपि विधानानि समुपदिष्टानि यथा-

प्राप्ते यूपोच्छ्रये तस्मिन् षड्बैल्वाः खादिरास्तथा। तावन्तो बिल्वसहिताः पर्णिनश्च तथा परे।।22।।

श्लेष्मातकमयो दिष्टो देवदारुमयस्तथा।।23।।

एकविंशतियूपास्ते एकविंशत्यरत्नयः। वासोभिरेकविंशद्भिरेकैकं समलङ्कृताः।।25।।

इष्टकाश्च यथान्यायं कारिताश्च प्रमाणतः। चितोऽग्निर्ब्राह्मणैस्तत्र कुशलैः शिल्पकर्मणि।।28।।

पशूनां त्रिशतं तत्र यूपेषु नियतं तदा। अश्वरत्नोपमं तत्र राज्ञो दशरथस्य ह।।32।।

होताध्वर्युस्तथोद्गाता हस्तेन समयोजयन्। महिष्या परिवृत्त्याथ वावातामपरां तथा।।35।।

हयस्य यानि चाङ्गानि तानि सर्वाणि ब्राह्मणाः। अग्नौ प्राश्यन्ति विधिवत् समस्ताः षोडशर्त्विजः।।38।।

त्र्यहोऽश्वमेधः संख्यातः कल्पसूत्रेण ब्राह्मणैः। चतुष्टोममहस्तस्य प्रथमं परिकल्पितम्।।40।।

ज्योतिष्टोमायुषी चैवमतिरात्रौ च निर्मितौ। अभिजिद्विश्वजिच्चैवमाप्तोर्यामौ महाक्रतुः।।42।।

प्राचीं होत्रे ददौ राजा दिशं स्वकुलवर्धनः। अध्वर्यवे प्रतीचीं तु ब्रह्मणे दक्षिणा दिशम्।।43।।

उद्गात्रे च तथोदीचीं दक्षिणैषा विनिर्मिता। अश्वमेधे महायज्ञे स्वयंभूविहिते पुरा।।44।।

एवमुक्तं सर्वमपि विधिविधानं श्रौतशास्त्रानुमोदितमेव विहितमस्ति। तेन रामायणे यज्ञव्यवस्थेति शीर्षकान्वितेन निबन्धेनाधुनेदं वक्तुं शक्यते यद्रामायणोक्ता अन्येऽपि सर्वे यागाः श्रौतशास्त्रानुमोदिता एव विहितास्सन्ति। तेन वाल्मीकिरामायणे यज्ञव्यवस्थायाः वर्णनमतीव रुचिकरं महत्त्वपूर्णञ्चास्तीति शम्।

जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।

**संदर्भ**


1. बृहद्धर्मपुराणे- 1/30/55
2. अग्निपुराणे- 5/1
3. वाल्मीकिरामायणे उत्तरकाण्डे-96/19
4. तैत्तिरीयोपनिषदि- 3/1
5. अर्थसङ्ग्रहे-यज्ञलक्षणप्रसङ्गे
6. श.प.ब्रा.-1/7/1/5
7. श्रीमद्भगवद्गीतायाम्-3/14
8. गोपथब्राह्मणे-5/23
9. वा.रा, बालकाण्डे अष्टमे सर्गे-1-3
10. सोमं प्रवक्तीति सोमप्रवाकः। सोमप्रवाकाय लवणमन्नं दध्नाहारयेत्। ला.श्रौ.सूत्रे- 1/1/12
11. वा.रा, बालकाण्डे अष्टमे सर्गे-4-5
12. वा.रा, बालकाण्डे अष्टमे सर्गे-12 एवं 15
13. मेधशब्दस्यार्थो भवति यज्ञ इति। मेध्यते दीव्यते इत्यसौ मेधः।
14. राज्ञोऽश्वमेधः सर्वकामस्य। का.श्रौ.सू.-20/1/1, अश्वमेधेन यजते सर्वान्कामानाप्नोति सर्वा व्युष्टीर्व्यश्नुते। शां.श्रौ.सू.-16/1/1, राजाश्वमेधेन यजेत। सत्या.श्रौ.सू.-14/1/1, सर्वस्य वा एषा प्रायश्चित्तिः सर्वस्य भेषजं सर्वं वा एतेन पाप्मान0 तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते, य उ चैनमैवं वेद। तै.सं.- 5/3/12
15. सार्वभौम इति- समग्रस्य भूमण्डलस्य शासिता, यस्य वशेऽन्ये सामन्ता राजानो वर्तन्ते।
16. अश्वं त्रिरूपम्। सर्वरूपं वा। शीघ्रम्। दक्षिणधुर्यसमम्। साहस्रम्। ललामम्। कृत्तिकाञ्जि वा। पूर्वकायकृष्णं शुक्लापरम्। कृष्णसारङ्गं वा। (का.श्रौ.सू.- 20/1/27-34)
17. ब्रह्माणं देवमुद्दिश्य होमार्थं ब्राह्मणानामृत्विजां च प्राशनार्थं च पच्यमान ओदनो ब्रह्मौदनः। (तै.ब्रा.- 1/1/9)
18. शु.य.सं.- 22/5
19. अग्नये स्वाहा सोमाय स्वाहापां मोदाय स्वाहा सवित्रे स्वाहा वायवे स्वाहा विष्णवे स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा।। (शु.य.सं.- 22/6)
20. देवा आशापाला इति (शु.य.सं.- 22/19), रक्षिणोऽस्यादिशत्यनुचरीजातीयांस्तावतस्तावतः कवचि-निषङ्गि-कलापि-दण्डिनो यथासंख्यम् (का.श्रौ.सू.- 20/2/11)
21. संवत्सरं रक्षन्ति (श.प.ब्रा.- 13/4/2/16)
22. मृतादर्शनयोरन्यस्य रशनादानादि करोत्यश्वयुक्तम्। (का.श्रौ.सू.-20/3/21)
23. का.श्रौ.सू.- 20/4/16-19
24. राज्जुदालः- श्लेष्मान्तकः। गुन्दी इति लोके प्रसिद्धः। देवयाज्ञिकपद्धतौ 650 पृष्ठे।
25. का.श्रौ.सू.- 8/8/25 , प्रातरग्निष्टोमः। एकाशिन्यौ सवनीयाः पशवो भवन्ति। का;श्रौ.सू.- 20/4/21-23
26. सर्वासामिष्टकानां प्रमाणानि ऊहयित्वा कार्याणि। देवयाज्ञिकपद्धतौ 649 पृष्ठे।
27. वा.रा. बालकाण्डे-14/1
28 **न प्रथमयज्ञे** (का.श्रौ.सू.- 26/7/53)
29 का.श्रौ.सू.- 8/2/15
30 वाल्मीकिरामायणे बालकाण्डे चतुर्दशसर्गे-


# 'भारते परिवर्तनं जातम्'

इदानीं राजनीतौ भारते परिवर्तनं जातम्।
स्वदेशे मोदिनो वा योगिनः अवतारणं जातम्।1।

पुराकालेऽपि धर्मार्थं महापुरुषोऽपि सञ्जातः।
समायाते पुनः काले सनातनरक्षणं प्राप्तम्।2।

स्वाकीया भारतीया संस्कृतिः परतन्त्रतामाप्ता।
समाजे स्वाभिमानार्थं मुनेर्मृदुभाषणं भातम्।3।

दुराचारैः महातङ्कैर्नरो नार्यश्च संत्रस्ताः।
बलं श्रीमोदिना देशे परं सहयोगिना वाप्तम्।4।

स्वदेशे वासिनो म्लेच्छाः सदा प्रलपन्ति रक्षायै।
स्वयं भुक्त्वा निजस्थाल्यां सदा जनयन्ति संतापम्।5।

यदा संरक्षकाः भ्रष्टाः प्रजानां भक्षकाः भूताः।
तदात्मानं सृजाम्येतद् हरेर्वचनं पुनर्यातम्।6।

यदा दुःशासने दुर्योधन: विजहाति मर्यादाम्।
तदैवागत्य 'रसराज' क्षणे प्रश्रृणाति दुष्पापम् ।7।


**-डॉ.राजेन्द्र त्रिपाठी 'रसराज'**
संस्कृत विभाग, इलाहाबाद डिग्री कॉलेज ,
इलाहाबाद विश्वविद्यालय ,प्रयागराज


साधुस्सदा वदेत् सत्यं नेदमावश्यकं सखे !
दर्शयेद् दर्पणस्सत्यं नेदमावश्यकं सखे! ।।1
आराद् यो दर्शनात् स्वस्थस्सुप्रसन्नः प्रतीयते
सोह्यन्तरपि भवेत् प्रीतो नेदमावश्यकं सखे! ।।2
सन्ति विभीषणाः केचिद् देशेह्यद्यापि क्वचित् क्वचित्
किन्तु रामव्रतास्ते स्युर्नेदमावश्यकं सखे! ।।3
सम्मुखं मधुरां वाचं ब्रूतेह्ययं मेस्त्यतः सखा
परोक्षेह्यपि तथा ब्रूयाद् नेदमावश्यकं सखे! ।।4
मन्दभाग्यो गतो यत्र तत्रैव विपदो गताः
द्वयोस्सङ्गस्सदैव स्याद् नेदमावश्यकं सखे ! ।।5
तुष्टे त्वयि समं कार्यं निर्विघ्नं यत् प्रवर्तितम्
रुष्टे रुद्धं भवेत् तन्मे नेदमावश्यकं सखे ! ।।6
पतन्ति बहवो भूम्यां कारणान्तरतोह्यपि वा
मद्येनैव पतेल्लोको नेदमावश्यकं सखे ! ।।7
प्रतिवेशी न मे तुष्टस्तद्देहं यत्र गम्यते
यानादेव प्रसन्नः स्याद् नेदमावश्यकं सखे ! ।।8
पश्चात् प्रेम करिष्येह्यहं कालोह्ययं मे रुषोह्यधुना
तवेष्टं सफलं तत् स्याद् नेदमावश्यकं सखे ! ।।9
यान्ति नद्यस्तडागाश्च सागरं मेलितुं सदा
अब्धिर्नदीं समागच्छेद् नेदमावश्यकं सखे ! ।।10
'कुमारः' सन्तु नाम्नेह कामं सौधशयालवः
मादृङ्मनो हरेयुस्ते नेदमावश्यकं सखे ! ।।11


रचयिता
**डा. राजकुमार मिश्रः 'कुमारः'**
(सहायकाचार्यः, साहित्यविभागः)
हरियाणा संस्कृत विद्यापीठम्,
बघौला, पलवलम्, हरियाणा 121102


# यु.एन.ओ.इत्यस्य जेनेवायां स्वास्थ्यसम्मेलनं सम्बोधयिष्यन्ति आचार्य बालकृष्णः

हरिद्वारम्। पतंजलि योगपीठे नूतनोपलब्धि युक्ता जातः। पतंजलि संस्थानस्य महामंत्री आचार्यबालकृष्णः यू.एन.ओ इत्यस्य संस्था विश्वस्य दस वृहत्तम प्रभावशाली जनानां सूच्यां संयुक्तः



कृतवान्। आगामि मई मासस्य पञ्चविंशति दिनांके जेनेवायां आयोजित स्वास्थ्य सम्मेलनं सम्बोधयिष्यति।

आचार्यबालकृष्ण इयं उपाधिः आयुर्वेद एवं योगस्य क्षेत्रे नूतन अनुसन्धानाय दत्तवान्। इदं सूचना योगपीठे पत्रकारवर्तायां आचार्यबालकृष्णः दत्तवान्। स्वामी रामदेवोऽपि तत्र आसीत्। ते उक्तवन्तः यत् इदं सम्मानं तु समाज एवं मानवतायाः कल्यानार्थमस्ति।

ते उक्तवन्तः यत् भारतीयचिकित्सापद्धति योग एवं आयुर्वेदः विश्वे पुनः स्थापितवान्। स्वामीरामदेवः यूएनओ इत्यस्य विषयेऽपि उक्तवान् यत् संस्था समाजसेवी कार्ये संलग्नोऽस्ति।

एषु प्राथमिकस्वास्थ्य एवं वैश्विकस्वास्थ्य विश्वे शांति स्थापना प्रमुखोऽस्ति। जेनेवायां स्वास्थ्य सम्मेलनं वर्ल्डहेल्थफोरम देशतः पञ्चशत् प्रतिभागी भागं गृहीष्यन्ति। एषु बहुदेशस्य स्वास्थ्यमंत्री, नीतिनिर्माता, उद्योग एवं प्रशासनीक समाजस्यध्यक्ष, सीईओ एवं संस्थायाः अधिकारीणः भविष्यन्ति।

# ‘समसामयिकी समस्यानां समाधाने वैदिक वांगमयस्य उपादेयता’ इति विषयमधिकृत्य द्विदिवसीया राष्ट्रीयसंगोष्ठी

**–प्रो. उमारानी त्रिपाठी**

वाराणसी। समसामयिक समस्याओं के समाधान में वैदिक वाङ्मय की उपादेयता इति विषयमधिकृत्य द्विदिवसीया राष्ट्रीयसंगोष्ठी दिनांक11–12मई 2019 म.गां.काशीविद्यापीठ वाराणस्यां संस्कृत एवम् अन्य प्राच्यभाषा विभागे समायोजिता आसीद्।

संगोष्ठ्याः समुद्घाटनसत्रे प्रो. टी.एन. सिंह, कुलपति महोदय अध्यक्षपदमलंकुर्वाणो निज वक्तव्येह्यवोचद्



वेद अद्यतन वैज्ञानिकयुगेह्यपिअतीव प्रासंगिकः। आयोजनेह्यस्मिन् मुख्यातिथित्वेन राराजमानाः सं.सं.विश्वविद्यालय वाराणस्याः कुलपतिचराः प्रो. अभिराज राजेंद्र मिश्र महाभागाःस्वीये उद्बोधने ह्यब्रवीद् वेदाः नः संरक्षणाय सर्गकालादेव ईश्वर निःश्वास रूपेण प्रादुर्भूवन्। यो वैदिकं तत्त्वज्ञानमधिगच्छति सः सकलसृष्टिमूलमभिजानाति। मीराबाई रैदास कबीर तुलसी प्रभृतयः महापुरुषाः लोककल्याणहेतोः वेदं समुपबृंहयन्। हेमवतीनंदन बहुगुणा केन्द्रीय विश्वविद्यालय श्री नगर गढवाल, उत्तराखंड संस्कृत विभागाध्यक्षचराः प्रो.। रामप्रतापतिवारीह्यत्र वरेण्यातिथि आसन्। सः निज वक्तव्ये ईशावास्योपनिषदि ईशावास्यमिदं सर्वमिति प्रथममंत्रस्य व्याख्याकुर्वनब्रवीत् वर्तमान काले प्रसृतानां सकल समस्यानांसमवेतत्वेनैव समाधानाय अयमेव अमोघोपायः।

अत्र विशिष्टातिथिरूपेण समुपस्थिताः प्रो. के. पी. सिंह पूर्व विभागाध्यक्ष, संस्कृत, कलासंकाय, काशीहिन्दू विश्वविद्यालय वाराणसी महोदय उक्तवान्– सामाजिकसमरसताहेतोः वैदिकंज्ञानं समुदाचारं च अत्यन्तं प्रासंगिकमिति। अत्र सारस्वतातिथित्वेन समागताः प्रो. प्रभुनाथ द्विवेदी महोदयेन साम्प्रतिकसमस्यानां मध्ये पर्यावरण प्रदूषणसमाधानाय वैदिकपरम्परागतयज्ञपद्धतिमनिवार्यतयाह्यह्यवश्यकमिति प्रोक्तम्। संगोष्ठ्याः संयोजिका विभागाध्यक्षा प्रो. उमारानी त्रिपाठी महोदया समागतानामतिथीनां स्वागतमभिनंदनं व्याहरन् विषयप्रवर्तनमकरोदिति। उद्घाटन समारोहसत्रस्य संचालकः पूर्व विभागाध्यक्ष प्रो. राममूर्ति चतुर्वेदी आसीद्।

अस्मिन्नेव दिने शैक्षिक सत्रे सत्राध्यक्ष प्रो. श्री प्रकाश राय संस्कृत विभागाध्यक्ष, मुख्यातिथित्वेन प्रो. कृष्ण दत्त मिश्र पूर्वाचार्य, संस्कृत विभाग. म. गां. का. वि. वाराणसी आसन्। सत्रे ह्यस्मिन् डा. विवेक पाण्डेय विभागाध्यक्ष, संस्कृत, हंडिया पी.जी. कालेज, इलाहाबाद, डा. भारतेन्दु द्विवेदी, अथ च, पटना,बोधगया उज्जैन ग्वालियर स्थानेभ्यः समागताः विद्वांसः प्रतिभागिनः शोधच्छात्राश्च शोधपत्रवाचनमकुर्वन्। सायंकाले सांस्कृतिक सत्रे भगवत्याः भागीरथ्याः तीरे श्रीकाशीविश्वनाथ मंदिरपरिसरे सांस्कृतिकंकार्यक्रमः कविगोष्ठी च प्राचलत्।

द्वितीयदिवसेप्रातःकाले प्रथमसत्रे दिल्ली विश्वविद्यालय संस्कृत विभागादागतः डा. दयाशंकर तिवारी सत्राध्यक्षत्वेन, द्वितीय सत्रे प्रो. मुरली मनोहर पाठक महोदयाः सत्राध्यक्षदायित्वं निर्वहन्तो स्वकीये सम्बोधने वेदानां सकलज्ञानविज्ञानाकरत्वं प्रतिपादयन् लोकेषु वैदिकविचारान् प्रति उपेक्षाभावमेव वर्तमानकालिकसमस्तसमस्यानांजननी इति न्यरूपयन्। अत्र डा. अजय कुमार मिश्र महोदयः संस्कृत विभागाध्यक्षः , सीधो कान्हो बिरशा विश्वविद्यालय पुरुलिया प.बंगाल विशिष्टातिथि आसीद्। डा. अनीता सत्र संचालनं कृतवती ,डा. सीमायादव सत्रस्यास्य धन्यवादं ज्ञापितवती।

सम्पूर्ति सत्रे ह्यस्मिन् प्रो. हरेराम त्रिपाठी पूर्व विभागाध्यक्षाध्यक्ष्ये मुख्यातिथित्वेन गरिमामयी समुपस्थितिरासीद्– डा. वाचस्पति मिश्र अध्यक्ष, उ.प्र. संस्कृत संस्थान, लखनऊ।अत्र सारस्वतातिथि रूपेण विराजमानाःप्रो.विजयशंकर शुक्ल क्षेत्रीय निदेशक, इन्दिरा गांधी राष्ट्रीय कलाकेन्द्र, वाराणसी महोदयेनोक्तम्– अद्यावधिपर्यन्तानां समस्तज्ञानविज्ञानानां मूल उत्स लोकोपकारी वेदराशिरेव।

अत्र विशिष्टातिथिरूपेण समुपस्थिताःप्रो.देवेन्द्र मोहन, भारतीय प्रौद्योगिकी संस्थान, काशीहिन्दू विश्वविद्यालय वाराणसी महोदयेन प्रोक्तमिदं यन्नैतिकमूल्यानां ह्रासेनैववर्तमानकाले समस्तसमस्याः संजाता दृश्यन्ते। अतः वैदिक जीवनमूल्यानामनुसरणमेव शरणम्। राष्टीय संगोष्ठ्यामस्यां 45 शोधपत्राणां वाचनं कृतम्। कार्यक्रमे ह्यस्मिन् प्रो. श्री निवास ओझा, डा. सुरेश चंद्र चौबे, डा. उपेंद्र देव पाण्डेय, डा. पंचबहादुरसिंह,डा. चंद्रमा प्रसाद, डा.शमा मिश्रा, डा. अनीता, डा.सीमा, डा.सत्यप्रकाश मिश्र, डा. शैलेश पाण्डेय तथा विविध प्रदेशेभ्यः समागताः विद्वांसः समुपस्थिताआसन्। डा. दीपककुमार सम्पूर्ति सत्रसंचालकःआसीदिति।अन्ततः विभागाध्यक्षा प्रो. उमारानी त्रिपाठी द्वारा धन्यवाद ज्ञापनपूर्वकं संगोष्ठी सम्पूर्णा जाता।

## २०१६ वर्षस्य राष्ट्रपतिसम्मानप्राप्तकर्तृणां संक्षिप्तपरिचयः

### ( १ )

### श्री आर. वेंकटराम घनपाठी



श्रीवेंकटरामधनपाठी महोदयस्य जन्म जूनमासस्य षड् दिनांके 1946 तमे वर्षे चेन्नईनगरे अभवत्। वैदिकशिक्षायाः आरम्भिकचरणे भवान् ब्रह्ममश्री सी श्रीनिवासशास्त्रिगल एवं ब्रहमश्री रामस्वामीशर्मायाः सानिध्ये कृष्णयजुर्वेदस्य अध्ययनं कृतवान्। अध्ययनोपरान्त भवान् अन्याषां शास्त्राणां अध्ययनं कृतवान्। तदुपरान्त 1984 तमे वर्षे कोचिकामकोटिपीठस्य प्रतिष्ठित परमाचार्यस्य मार्गदर्शने श्रीशंकरगुरूकुल वेदपाठशालायाः स्थापना कृतवान। इदानीन्तन समये तत्र 135 छात्राः अध्ययनं कुर्वन्ति।

भवतां वेदपाठसंरक्षणस्य क्षेत्रे अप्रतिम् योगदानमस्ति। भवान् अनेक स्त्रोतस्य रचना एवं शास्त्रीय ग्रन्थस्य प्रकाशनमपि कृतवान्। भवान् बेंकटरामधनपाठीशंकराचार्यगुरूकुलवेदशालायाः ट्रस्टी अपि अस्ति।

पत्राचारसंकेतः
18–261 मल्लिकार्जुननगर, मलकाजगिरि,
हैदराबाद, पिन–500047 (तेलंगाना)

### ( २ )

### डॉ. विश्वनाथ गोपालकृष्णः



डॉ.विश्वनाथपोपालकृष्णस्य जन्म जूनमासस्य षोडष दिनाके 1949 तमे वर्ष आन्ध्रप्रदेशस्य राजमहेन्द्रवरम् नगरे अभवत्। भवान् परम्परागत् वैदिकपरिवारेन् सम्बन्धितोऽस्ति। भवान् तर्क, व्याकरणमेवं वेदान्तशास्त्रस्य ज्ञानं परम्परागत रीत्या महामहोपाध्यायेन् प्राप्तवान्। भवतां अध्ययनवृत्तः अत्युत्कृष्ट आसीत्। भवान् 1969 तमे वर्षे आंध्रप्रदेशविश्वविद्यालयेन् विद्याप्रवीणं उपाध्यां स्वर्णपदकं प्राप्तवान्। उपाचार्य पदे अध्यापनं कृत्वा भवान् बहु सम्मानं अर्जितवान्। भवान् श्री गौतमीविद्यापीठे प्राचार्यमपि आसीत्। भवान् चेन्नई नगरे परमसम्माननीय जगद्गुरू श्री भारतीतीर्थमहास्वामी एवं राष्ट्रिसंस्कृतविद्यापीठतिरूपतितः महामहोपाध्यायः इत्युपाधि प्राप्तवान्। भवान् ए.वी.वि.विद्यालये सदस्य रूपे स्व सेवा दत्तवान्। भवान् आकाशवाणी एवं दूरदर्शने अपि शास्त्रीविषये स्व व्याख्यानं दत्तवान्।

भवान् तेलुगुभाषायां पुष्करमहात्म्यम् एवं धर्मजीवनमु इत्यस्य प्रकाशनं कृतवान्। भवान् संस्कृतभारत्याः प्रदेशाध्यक्ष अपि आसीत्। भवान् संस्कृतविश्वविद्यालयानां पुनश्चर्यापाठ्यक्रमे विशेषज्ञरूपे व्याख्यानं दत्तवान्। सम्प्रति भवान् गुरूकुलपद्वत्यां शिक्षणं प्रददति स्म।

पत्राचारसंकेतः
म.न. 20–16–57, तुम्मलव राजमण्ड्री,
पिन–533104 (आंध्रप्रदेश)

# बाबारामदेवः पाखण्डस्य खण्डनं कृतवान न तु ज्योतिषस्य

देहरादून। अमरउजाला एवं ग्राफिकऐरावि–विद्यालयस्य पक्षतः आयोजित ज्योतिषमहाकुंभस्य अंतिम दिवसे मुख्यातिथि रूपे उपस्थित आचार्यबालकृष्णः स्पष्टं कृतवान् यत् बाबारामदेवः




कुत्रापि ज्योतिष एवं ज्योतिषज्ञानां विरोधः न कृतवान्। ते सर्वथा ज्योतिषज्ञानां रूपे पाखंडीजनानां विरोधं कृतवन्तः। तत्र अनेन् कथनेन् अयं विवादः समाप्तो जातः। तत्र बालकृष्णः पतंजलि हरिद्वारे ज्योतिषमहाकुम्भस्य घोषणा कृतवान्। तत्र आचार्यबालकृष्णः उक्तवान् यत् ज्योतिषविद्या जीवनं सुखमयं निर्माति।

अस्मान् तस्य संरक्षणेन् सह तं प्रति जागरूकता करणीयम्। ज्योतिषज्ञानां आग्रह करणोपरान्त बालकृष्णः पतंजलि हरिद्वारे ज्योतिषपीठस्य आयोजनार्थं घोषणा कृतवान्। अनेन ज्योतिष छात्रान् लाभः भविष्यति। एवं आयोजकानां प्रशंसा कृत्वा उक्तवान् यत् अनेन आयोजनेन देशस्य ज्योतिषज्ञान् नूतन मंचः मिलितवान्। येन सहस्त्र जनान् लाभः अभवत।

अस्माकं प्रेरणास्त्रोतः– स्व.पं० रामकिशोरशर्मा,
परामर्शकाः–डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका–मञ्जूशर्मा, उपसम्पादकः– डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ– वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल–ऑफसेट–प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली–53तः मुद्रापयित्वा ए–2/32, वजीराबादमार्गः भजनपुरा, देहली–53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई–मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2018-20 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।